# bRihatpArAsharahorAshAstramh 46-50

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૪૬-૫૦

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 46-50

File name : par4650.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# bRihatpArAsharahorAshAstramh 46-50

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૪૬-૫૦

અથ દશાધ્યાય ॥ ૪૬॥

સર્વજ્ઞોઽસિ મહર્ષે ત્વં કૃપયા દીનવત્સલ ।
દશાઃ કતિવિધાઃ સન્તિ તન્મે કથય તત્ત્વતઃ ॥ ૧॥

સાધુ પૃષ્ટં ત્વયા વિપ્ર લોકાનુગ્રહકારિણા ।
કથયામિ તવાગ્રેઽહં દશભેદાનનેકશઃ ॥ ૨॥

દશાબહુવિધાસ્તાસુ મુખ્યા વિંશોત્તરી મતા ।
કૈશ્ચિદષ્ટોત્તરી કૈશ્ચિત્ કથિતા ષોડશોત્તરી ॥ ૩॥

દ્વાદશાબ્દોત્તરી વિપ્ર દશા પઞ્ચોત્તરી તથા ।
દશા શતસમા તદ્વત્ ચતુરાશીતિવત્સરા ॥ ૪॥

દ્વિસપ્તતિસમા ષષ્ટિસમા ષડ્ત્રિંશવત્સરા ।
નક્ષત્રાધારિકાશ્ચૈતાઃ કથિતાઃ પૂર્વસૂરિભિઃ ॥ ૫॥

અથા કાલદશા ચક્રદશા પ્રોક્તા મુનીશ્વરૈઃ ।
કાલચક્રદશા ચાઽયા માન્યાસર્વદશાસુ યા ॥ ૬॥

દશાઽથ ચરપર્યાયા સ્થિરાખ્યા ચ દશા દ્વિજ ।
કેન્દ્રાદ્ય ચ દશા જ્ઞેયા કારકાદિગ્રહોદ્ભવા ॥ ૭॥

બ્રહ્મગ્રહાશ્રિતર્ક્ષાદ્યા દશા પ્રોક્તા તુ કેનચિત્ ।
માણ્ડૂકી ચ દશા નામ તથા સ્થૂલદશા સ્મૃતા ॥ ૮॥

યોગાર્ધજદશા વિપ્ર દૃગ્દશા ચ તતઃ પરમ્ ।
ત્રિકોણાખ્યા દશા નામ તથા રાશિદશા સ્મૃતા ॥ ૯॥

પઞ્ચસ્વરદશા વિપ્ર વિજ્ઞેયા યોગિનીદશા ।
દશા પૈણ્ડી તથાંશી ચ નૈસર્ગિકદશા તથા ॥ ૧૦॥

અષ્ટવર્ગદશ સન્ધ્યાદસા પાચકસંજ્ઞિકા ।
અન્યાસ્તારાદશાદ્યાશ્ચ ન સ્વર્ગાઃ સર્વસમ્મતાઃ ॥ ૧૧॥

કૃત્તિકાતઃ સમારભ્ય ત્રિરાવૃત્ય દશાધિપાઃ ।
આચંકુરાગુશબુકેશુપૂર્વા વિહગાઃ ક્રમાત્ ॥ ૧૨॥

વહ્નિભાજ્જન્મભં યાવદ્ યા સંખ્યા નવતષ્ટિતા ।
શેષાદ્દશાધિપો જ્ઞેયસ્તમારભ્ય દશાં નયેત્ ॥ ૧૩॥

વિંશોત્તરશતં પૂર્ણમાયુઃ પૂર્વમુદાહૃતમ્ ।
કલૈ વિંશોત્તરી તસ્માદ્ દશા મુખ્યા દ્વિજોત્તમ ॥ ૧૪॥

દશાસમાઃ ક્રમાદેષાં ષડ્ દશાઽશ્વા ગજેન્દવઃ ।
નૃપાલા નવચન્દ્રાશ્ચ નવચન્દ્રા નગા નખાઃ ॥ ૧૫॥

દશામનાં ભયાતઘ્નં ભભોગેન હૃતં ફલમ્ ।
દશાયા ભુક્તવર્ષાદ્ય ભોગ્યં માનાદ્ વિશોધિતમ્ ॥ ૧૬॥

લગ્નેશાત્ કેન્દ્રકોણસ્થે રાહૌ લગ્નં વિના સ્થિતે ।
અષ્ટોત્તરી દશા વિપ્ર વિજ્ઞેયા રૌદ્રભાદિતઃ ॥ ૧૭॥

ચતુષ્કં ત્રિતયં તસ્માત્ ચતુષ્કં ત્રિતયં પુનઃ ।
એવં સ્વજન્મભં યાવદ્ વિગણય્ય યથાક્રમમ્ ॥ ૧૮॥

સૂર્યશ્ચન્દ્રઃ કુજઃ સૌમ્યઃ શનિર્જીવસ્તમો ભૃગુઃ ।
એતે દશાધિપા વિપ્ર જ્ઞેયાઃ કેતું વિના ગ્રહાઃ ॥ ૧૯॥

રસાઃ પઞ્ચેન્દવો નાગાઃ સપ્તચન્દ્રાશ્ચ ખેન્દવઃ ।
ગોઽબ્જાઃ સૂર્યાઃ કુનેત્રાશ્ચ રવ્યાદીનાં દશાસમાઃ ॥ ૨૦॥

દશાબ્દાંઘ્રિશ્ચ પાપાનાં શુભાનાં ત્ર્યંશ એવ હિ ।
એકૈકભે દશામાનં વિજ્ઞેયં દ્વિજસત્તમ ॥ ૨૧॥

તતસ્તદ્યાતભોગાધ્યાં ભુક્તં ભોગ્યં ચ સાધયેત્ ।
વિંશોત્તરીવદેવાત્ર તતસ્તત્ફલમાદિશેત્ ॥ ૨૨॥

કૃષ્ણપક્ષે દિવા જન્મ શુક્લપક્ષે તથા નિશિ ।
તદા હ્યષ્ટોત્તરી ચિન્ત્યા ફલાર્થઞ્ચ વિશેષતઃ ॥ ૨૩॥

ચન્દ્રહોરાગતે કૃષ્ણે સૂર્યહોરાગતે સિતી ।
લગ્ને નૃણાં ફલજ્ઞાપ્ત્યૈ વિચિન્ત્યા ષોડશોત્તરી ॥ ૨૪॥

પુષ્યભાજ્જન્મભં યાવદ્ યા સંખ્યા ગજતષ્ટિતા ।
રવિર્ભૌમો ગુરુર્મન્દઃ કેતુશ્ચન્દ્રો બુધો ભૃગુઃ ॥ ૨૫॥

ઇતિ ક્રમાદ્ દશાધીશાઃ જ્ઞેયા રાહું વિના ગ્રહાઃ ।
રુદ્રાદ્યેકોત્તરાઃ સંખ્યા ધૃત્યન્તં વત્સરાઃ ક્રમાત્ ॥ ૨૬॥

શુક્રાંશકે પ્રજાતસ્ય વિચિન્ત્યા દ્વાદશોત્તરી ।
જન્મભાત્ પૌષ્ણભં યાવત્ સંખ્યા હિ વસુતષ્ટિતા ॥ ૨૭॥

સૂર્યો ગુરુઃ શિખી જ્ઞોઽગુઃ કુજો મન્દો નિશાકરઃ ।
વિના શુક્રં દશાધીશા દ્વિચયાત્ સપ્તતઃ સમાઃ ॥ ૨૮॥

અર્કાંશ કર્કલગ્ને પઞ્ચોત્તરી મતા ।
મિત્રર્ક્ષાજ્જન્મભં યાવત્ સંખ્યા સપ્તવિભાજિતા ॥ ૨૯॥

એકાદિશેષે વિજ્ઞ્યાઃ ક્રમાત્સપ્તદશાધિપાઃ ।
રવિર્જ્ઞોઽર્કસુતો ભૌમઃ શુક્રશ્ચન્દ્રો બૃહસ્પતિઃ ॥ ૩૦॥

એકોત્તરાચ્ચ વિજ્ઞેયા દ્વાદશાદ્યાઃ ક્રમાત્સમાઃ ।
ધૃત્યન્તાઃ સપ્તખેટાનાં રાહુકેતૂ વિના દ્વિજ ॥ ૩૧॥

વર્ગોત્તમગતે લગ્ને દશા ચિન્ત્યા શતાબ્દિકા ।
પૌષ્ણભાજ્જન્મપર્યન્તં ગણયેત્ સપ્તભિર્ભજેત્ ॥ ૩૨॥

શેષાઙ્કે રવિતો જ્ઞેયા દશા શતસમાહ્વયા ।
રવિશ્ચન્દ્રો ભૃગુર્જ્ઞશ્ચ જીવો ભૌમઃ શનિસ્તથા ॥ ૩૩॥

ક્રમદેતે દશાધીશા બાણા બાણા દિશો દશ ।
નખા નખાઃ ખરામાશ્ચ સમાજ્ઞેયા દ્વિજોત્તમ ॥ ૩૪॥

કર્મેશે કર્મગે જ્ઞેયા ચતુરાશીતિકા દશા ।
પવનાજ્જન્મભં યાવદ્ યા સઙ્ખ્યા સપ્તભાજિતા ॥ ૩૫॥

શેષે રવીન્દુભૌમજ્ઞા ગુરુશુક્રશનૈશ્ચરાઃ ।
દશાધીશાઃ ક્રમાદેષાં જ્ઞેયા દ્વાદશવત્સરાઃ ॥ ૩૬॥

મૂલાજ્જન્મર્ક્ષપર્યન્તં ગણયેદષ્ટભિર્ભજેત્ ।
શેષાદ્દશાધીપા જ્ન્‘એયા અષ્ટૌ રવ્યાદયઃ ક્રમાત્ ॥ ૩૭॥

નવ વર્ષાણિ સર્વેષાં વિકેતૂનાં નભઃસદામ્ ।

લગ્નેશે સપ્તમે યસ્ય લગ્ને વા સપ્તમાધિપે ॥ ૩૮॥

ચિન્તનીયા દશા તસ્ય દ્વિસપ્તતિસમાહ્વયા ।
વિંશોત્તરીવદત્રાઽપિ ભુક્તં ભોગ્યં ચ સાધયેત્ ॥ ૩૯॥

યદાર્કો લગ્નરાશિસ્થશ્ચિન્ત્યા ષષ્ટિસમા તદા ।
દાસ્રાત્ ત્રયં ચતુષ્કં ચ ત્રયં ચેતિ પુનઃ પુનઃ ॥ ૪૦॥

ગુર્વર્કભૂસુતાનાં ચ દશા દશ દશાબ્દકાઃ ।
તતઃ શશિજ્ઞશુક્રાર્કપુત્રાગૂનાં રસાબ્દકાઃ ॥ ૪૧॥

શ્રવણાજ્જન્મભં યાવત્ સંખ્યા વસુવિભાજિતા ।
શેષે ચન્દ્રરવીજ્યારબુધાર્કિભૃગુરાહવઃ ॥ ૪૨॥

ક્રમાદ્દશાધિપાસ્તેષામેકાદ્યેકોત્તરાઃ સમા ।
લગ્ને દિનેઽર્કહોરાયાં ચન્દ્રહોરાગતે નિશિ ॥ ૪૩॥

સૂર્યસ્યાઽર્ધાસ્તયઃ પૂર્વં પરસ્તાદૂદયાદપિ ।
પઞ્ચ પઞ્ચ ઘટી સન્ધ્યા દશનાડી પ્રકીર્તિતા ॥ ૪૪॥

સન્ધ્યાદ્વયઞ્ચ વિંશત્યા નાડિકાભિઃ પ્રકીર્તિતમ્ ।
દિનસ્ય વિંશતિર્ઘટ્યઃ પૂર્ણસંજ્ઞા ઉદાહૃતાઃ ॥ ૪૫॥

નિશાયાઃ મુગ્ધસંજ્ઞાશ્ચ ઘટિકા વિંશતિશ્ચ યાઃ ।
સૂર્યોદયે ચ યા સન્ધ્યા ખણ્ડાખ્યા દ/સનાડિકા ॥ ૪૬॥

અસ્તકાલે ચ યા સન્ધ્યા સુધાખ્યા દશનાડિકા ।
પૂર્ણમુગ્ધઘટીમાને દ્વિગુણે તિથિભિર્ભજેત્ ॥ ૪૭॥

તથા ખણ્ડસુધાઘટ્યૌ ચતુર્ઘ્ને તિથિભિર્ભજેત્ ।
લબ્ધં વર્ષાદિકં માનં સૂર્યાદીનાં ખચારિણામ્ ॥ ૪૮॥

એકાદિસંખ્યયા નિઘ્નં દશામાનં પૃથક્ ક્રમાત્ ।
રાહુકેતુયુતાનાં ચ નવાનાં કાલસંજ્ઞકમ્ ॥ ૪૯॥

રાત્રૌ લગ્નાશ્રિતાદ્રાશેર્દિને લગ્નેશ્વરાશ્રિતામ્ ।
સન્ધ્યાયાં વિત્તભાવસ્થાન્નેયા ચક્રદશા બુધૈઃ ॥ ૫૦॥

દશા વર્ષાણિ રાશીનામેકૈકસ્ય દશામિતિઃ ।
ક્રમાચ્ચક્રસ્થિતાનાઞ્ચ વિજ્ઞાતવ્યા દ્વિજોત્તમ ॥ ૫૧॥

અથાઽહં શઙ્કરં નત્વા કાલચક્રદશાં બ્રુવે ।
પાર્વત્યૈ કથિતા પૂર્વં સાદરં યા પિનાકિના ॥ ૫૨॥

તસ્યાઃ સારં સમુદ્ધૃત્ય તવાગ્રે દ્વિજમન્દન ।
શુભાઽશુભં મનુષ્યાણાં યથા જાનન્તિ પણ્ડિતાઃ ॥ ૫૩॥

દ્વાદશારં લિખેચ્ચક્રં તિર્યગૂર્ધ્વસમાનકમ્ ।
ગૃહા દ્વાદશ જાયન્તે સવ્યેઽસવ્યે દ્વિધા દ્વિજ ॥ ૫૪॥

દ્વિતીયાદિષુ કોષ્ઠેષુ રાશીન્ મેષાદિકાન્ લિખેત્ ।
એવં દ્વાદશરાશ્યાખ્યં કાલચક્રમુદીરિતમ્ ॥ ૫૫॥

અશ્વિન્યાદિત્રયં સવ્યમાર્ગે ચક્રે વ્યવસ્થિતમ્ ।
રોહિણ્યાદિત્રયં ચૈવમપસવ્યે વ્યવિસ્થિતમ્ ॥ ૫૬॥

એવમૃક્ષવિભાગં હિ કૃત્વા ચક્રં સમુદ્ધરેત્ ।
અશ્વિન્યદિતિહસ્તક્ષેમૂલપ્રોષ્ઠપદાભિધાઃ ॥ ૫૭॥

વહ્નિવાતાદિવિશ્વર્ક્ષરેવત્યઃ સવ્યતારકાઃ ।
એતદ્દશોષુપાદાનામશ્વિન્યાદૌ ચ વીક્ષયેત્ ॥ ૫૮॥

દેહજીવૌ કથં વીક્ષ્યૌ નક્ષત્રાણાં પદેષુ ચ ।
વિશદં તત્પ્રકારં ચ મૈત્રેય કથયામયહમ્ ॥ ૫૯॥

દેહજીવૌ મેષચાપૌ દાસ્રાદ્યચરણસ્ય ચ ।
મેષાદ્યાશ્ચાપપર્યન્તં રાશિપાશ્ચ દશાધિપાઃ ॥ ૬૦॥

મૃગયુગ્મે દેહજીવૌ દ્વિતીયચરણે સ્મૃતૌ ।
ક્રમાત્ મિથુનપર્યન્તં રાશિપાશ્ચ દશાધિપાઃ ॥ ૬૧॥

દાસ્રાદિદશતારાણાં તૃતીયચરણે દ્વિજ ।
ગૌર્દેહો મિથુનં જીવો દ્વ્યેકાર્કેશદશાઙ્કપાઃ ॥ ૬૨॥

ક્વક્ષિરામર્ક્ષનાથાશ્ચ દશાધિપતયઃ ક્રમાત્ ।
અશ્વિન્યાદિદશૌડૂનાં ચતુર્થચરણે તથા ॥ ૬૩॥

કર્કમીનૌ દેહજીવૌ કર્કાદિનવરાશિપાઃ ।
દશાધીશાશ્ચ વિજ્ઞેયા નવૈતે દ્વિજસત્તમ ॥ ૬૪॥

યમેજ્યચિત્રાતોયર્ક્ષાઽહીર્બુધ્ન્યાઃ સવ્યતારકાઃ ।
એતત્પઞ્ચોડુપાદાનાં ભરણ્યાદૌ વિચિન્તયેત્ ॥ ૬૫॥

યામ્યપ્રથમપાદસ્ય દેહજીવાવલિર્ઝષઃ ।
નાગાગર્તુપયોધીષુરામાક્ષીન્દ્વર્કભેશ્વરાઃ ॥ ૬૬॥

યામ્યદ્વિતીયપાદસ્ય દેહજીવૌ ઘટાઙ્ગને ।
રુદ્રદિઙ્નન્દચન્દ્રાક્ષિરામાબ્ધીષ્વઙ્ગભેશ્વરાઃ ॥ ૬૭॥

યામ્યતૃતીયપાદસ્ય દેહજીવૌ તુલાઙ્ગને ।
સપ્તાષ્ટાઙ્કદિગીશાર્કગજાદ્રિરમભેશ્વરાઃ ॥ ૬૮॥

કર્કો દેહો ધનુર્જીવો યામ્યતુર્યપદે દ્વિજ ।
વેદબાણાગ્નિનેત્રેન્દુસૂર્યેશાશાઙ્કભેશ્વરાઃ ॥ ૬૯॥

સપ્તમેવં વિજાનીયાદસવ્યં કથયામ્યહમ્ ।
દ્વાદશારાં લિખેચ્ચકં પૂર્વવદ્ દ્વિજસત્તમ ॥ ૭૦॥

દ્વિતીયાદિષુ કોષ્ઠેષુ વૃશ્ચિકાદ્ વ્યસ્તમાલિખીત્ ।
રોહિણી ચ મઘા દ્વીશઃ કર્ણશ્ચેતિ ચતુષ્ટયમ્ ॥ ૭૧॥

ઉક્તં ચાઽસવ્યનાક્ષત્રં પૂર્વાચાર્યૈર્દ્વિજોત્તમ ।
એતદ્વેદોડુપાદાનાં રોહિનીવન્નિરીક્ષયેત્ ॥ ૭૨॥

રોહિણ્યાદિપદે દેહજીવૌ કર્કિધનુર્ધરૌ ।
નવદિગ્રુદ્રસૂર્યેન્દુનેત્રાગ્નોષ્વબ્ધિભેશ્વરાઃ ॥ ૭૩॥

ધાતૃદ્વિતીચરણે દેહજીવૌ તુલસ્ત્રિયૌ ।
અઙ્કાગવસુસૂર્યેશદિગઙ્કવસુજૂકપાઃ ॥ ૭૪॥

તૃતીયચરણે બ્રાહ્મ દીહજીવૌ ઘટાઙ્ગને ।
ષડ્બાણબ્ધિગુણક્ષીન્દુનન્દદિગ્રુદ્રભેશ્વરાઃ ॥ ૭૫॥

રોહિણ્યન્તપદે દેહજીવાવલિજષૌ સ્મૃતૌ ।
સૂર્યેન્દુદ્વિગુણેષ્વબ્ધિતર્કશૈલાષ્ટભેશ્વરાઃ ॥ ૭૬॥

ચાન્દ્રરૌદ્રભગાર્યમણમિત્રેન્દુવસુવારુણમ્ ।
એતત્તારાષ્ટકં વિજ્ઞૈર્વિજ્ઞેયં ચાન્દ્રવત્ ક્રમાત્ ॥ ૭૭॥

કર્કો દેહો ઝષો જીવો મૃગાદ્યચરણે દ્વિજ ।
વ્યસ્તાન્મીનાદિકર્કાન્તરાશિપાશ્ચ દશાધિપાઃ ॥ ૭૮॥

ગૌર્દેહો મિથુનં જીવો દ્વિતીયચરણે મૃગે ।

ત્રિદ્વ્યેકાઙ્કુદિશીશાર્કચન્દ્રાક્ષિભવનાધિપાઃ ॥ ૭૯॥

દેહજીવૌ નક્રયુગ્મે તૃતીયચરણે મૃગે ।
ત્રિબાણાબ્ધિરસાગાષ્ટસૂર્યેશદશભેશ્વરાઃ ॥ ૮૦॥

મેષો દેહો ધનુર્જીવો ચતુર્થચરણે મૃગે ।
વ્યસ્તાચ્ચાપાદિમેષાન્તરાશિપાશ્ચ દશાધિપાઃ ॥ ૮૧॥

અપસવ્યગણે ત્વેવં દેહજીવદશાદિકમ્ ।
પાર્વત્યૈ શમ્ભુના પ્રોક્તમિદાવીંકથિતં મયા ॥ ૮૨॥

કેષાં ચ કતિ વર્ષાણિ દશેશાનાં મહામુને ।
દશાયા ભુક્તભોગ્યાદ્યં તદારમ્ભ પ્રચક્ષ્વ મે ॥ ૮૩॥

ભૂતૈકવિંશગિરયો નવદિક્ષોડશાબ્ધયઃ ।
સૂર્યાદીનાં દશાબ્ધાઃ સ્યૂ રાશીનાં સ્વામિનો વશાત્ ॥ ૮૪॥

નરસ્ય જન્મકાલે વા પ્રશ્નકાલે યદંશકઃ ।
તદાદિનવરાશિનામબ્દાસ્તસ્યાયુરુચ્યતે ॥ ૮૫॥

સમ્પૂર્ણાયુર્ભવેદાદાવર્ધમંશસ્ય મધ્યકે ।
અંશાન્તે પરમં કષ્ટમિત્યાહુરપરે બુધાઃ ॥ ૮૬॥

જ્ઞાત્વૈવં સ્ફુટસિદ્ધાન્તં રાશ્યંશં ગણયેદ્ બુધઃ ।
અનુપાતેન વક્ષ્યામિ તદુપાયમતઃ પરમ્ ॥ ૮૭॥

ગતતારાસ્ત્રિભિર્ભક્તાઃ શેષં ચૈવ ચતુર્ગુણમ્ ।
વર્તમાનપદેનાઢ્યં રાશીનામંશકો ભવેત્ ॥ ૮૮॥

મેષે શતં વૃષેઽક્ષાષ્ટૌ મિથુને ત્રિગજાઃ સમાઃ ।
કર્કટેઽઙ્ગગજાઃ પ્રોક્તાસ્તાવન્તસ્તત્ત્રિકોણયોઃ ॥ ૮૯॥

જનો યત્રાંશકે જાતો ગતનાડીપલાદિભિઃ ।
તદંશસ્ય હતાઃ સ્વાબ્દાઃ પઞ્ચભૂમિવિભાજિતાઃ ॥ ૯૦॥

એવં મહાદશારમ્ભો ભવેદંશાદ્યથા ક્રમાત્ ।
ગણયેન્નવપર્યન્તં તત્તદાયુઃ પ્રકીર્તિતમ્ ॥ ૯૧॥

પદસ્ય ભુક્તઘટ્યાદ્યૈઃ સ્વાબ્દમાનં હતં તતઃ ।
ભભોગાંઘ્રિહૃતં ભુક્તં ભોગ્યં માનાદ્ વિશોધિતમ્ ॥ ૯૨॥

ચન્દ્રાङ્ગાંશકલા ભુક્તાઃ સ્વાબ્દમાનહતા હૃતાઃ ।
દ્વિશત્યા ભુક્તવર્ષાદ્યં જ્ઞેયં ભોગ્યં તતો બુધૈઃ ॥ ૯૩॥

સવ્યાખ્યે પ્રથમાંશો યઃ સ દેહ ઇતિ કથ્યતે ।
અન્ત્યાંશો જીવસંજ્ઞઃ સ્યાદ્ વિલોમમપસવ્યકે ॥ ૯૪॥

દેહાદિં ગણયેત્ સવ્યે જીવાદિમપસવ્યકે ।
એવં વિજ્ઞાય દૈવજ્ઞસ્તતસ્તત્ફલમાદિશેત્ ॥ ૯૫॥

કાલચક્રગતિઃ પ્રોક્તા ત્રિધા પૂર્વમહર્ષિભિઃ ।
મણ્ડૂકાખ્યા ગતિશ્ચૈકા મર્કટીસંજ્ઞકાઽપરા ॥ ૯૬॥

સિંહાવલોકનાખ્યા ચ તૃતીયા પરિકીર્તિતા ।
ઉત્પ્લુત્ય ગમનં વિજ્ઞા મણ્ડૂકાખ્યં પ્રચક્ષતે ॥ ૯૭॥

પૃષ્ઠતો ગમનં નામ મર્કટીસંજ્ઞકં તથા ।
વાણાચ્ચ નવપર્યન્તં ગતિઃ સિંહાવલોકનમ્ ॥ ૯૮॥

કન્યાકર્કટયોઃ સિંહયુગ્મયોર્મણ્ડૂપ્કી ગતિઃ ।
કર્કિકેસરિણોરેવં કથ્યતે મર્કટીં ગતિઃ ॥ ૯૯॥

મીનવૃશ્ચિકયોશ્ચાપમેષયોઃ સૈંહિકી ગતિઃ ।
ઇતિ સઞ્ચિન્ત્ય વિજ્ઞેયં કાલચક્રદશાફલમ્ ॥ ૧૦૦॥

મણ્ડૂકગતિકાલે હિ સવ્યે બન્ધુજને ભયમ્ ।
પિત્રોર્વા વિષશસ્ત્રાગ્નિજ્વરચોરાદિજં ભયમ્ ॥ ૧૦૧॥

કેસરીયુગ્મમણ્ડૂકે માતુર્મરણમાદિશેત્ ।
સ્વમૃતિં રાજભિતિં વા સન્નિપાતભયં ભવેત્ ॥ ૧૦૨॥

મર્કટીગમને સવ્યે ધનધાન્યપશુક્ષયઃ ।
પિતુર્મરણમાલસ્યં તત્સમાનાં ચ વ મૃતિઃ ॥ ૧૦૩॥

સવ્યે સિંહાવલોકે તુ પશુભીતિર્ભવેન્નૃણામ્ ।
સુહૃત્સ્નેહાદિનાશશ્ચ સમાનજનપીડનમ્ ॥ ૧૦૪॥

પતનં વાપિ કૂપાદૌ વિષશસ્તાગ્નિજં ભયમ્ ।
વાહનાત્ પતનં વાપિ જ્વરાર્તિઃ સ્થાનનાશનમ્ ॥ ૧૦૫॥

મણ્ડૂકગમને વામે સ્ત્રીસુતાદિપ્રપીડનમ્ ।
જ્વરં ચ શ્વાપદાદ્ ભીતિં વદેદ્ વિજ્ઞઃ પદચ્યુતિમ્ ॥ ૧૦૬॥

મર્કટીગમને વાઽપિ જલભીતિં પદચ્યુતિમ્ ।
પિતુર્નાશં નૃપક્રોધં દુર્ગારણ્યાટનં વદેત્ ॥ ૧૦૭॥

સિંહાવલોકને વામે પદભ્રંશઃ પિતુર્મૃતિઃ ।
તત્સમાનમૃતિર્વાઽપિ ફલમેવં વિચિન્તયેત્ ॥ ૧૦૮॥

મીનાત્ તુ વૃશ્ચિકે યાતે જ્વરો ભવતિ નિશ્ચિતઃ ।
કન્યાતઃ કર્કટે યાતે ભ્રાતૃબન્ધુવિનાશનમ્ ॥ ૧૦૯॥

સિંહાત્તુ મિથુને યાતે સ્ત્રિયા વ્યાધિર્ભવેદ્ ધ્રુવમ્ ।
કર્કટાચ્ચ હરૌ યાતે વધો ભવતિ દેહિનામ્ ॥ ૧૧૦॥

પિતૃબન્ધુમૃતિં વિદ્યાચ્ચાપાન્મેષે ગતે પુનઃ ।
ભયં પાપખગૈર્યુક્તે શુભખેટયુતે શુભમ્ ॥ ૧૧૧॥

શુભં વાઽપ્યશુભં વાઽપિ કાલચક્રદશાફલમ્ ।
રાશિદિક્ભાગતો વાપિ પૂર્વાદિદિગ્તભશ્ચરાત્ ॥ ૧૧૨॥

તદ્દિગાવભાગે વક્તવ્યં તદ્દશાસમયે નૃણામ્ ।
યથોપદેશમાર્ગેણ સર્વેષાં દ્વિજસત્તમ ॥ ૧૧૩॥

કન્યાતઃ કર્કટે યાતે પૂર્વભાગે મહત્ફલમ્ ।
ઉત્તરં દેશમાશ્રિત્ય શુભા યાત્રા ભવિષ્યતિ ॥ ૧૧૪॥

સિંહાત્તુ મિથુને યાતે પૂર્વભાગં વિવર્જયેત્ ।
કાર્યાન્તેઽપિ ચ નૈરૃત્યાં સુખં યાત્રા ભવિષ્યતિ ॥ ૧૧૫॥

કર્કટાત્ સિંહભે યાતે કાર્યહાનિશ્ચ દક્ષિણે ।
દક્ષિણાં દિશમાશ્રિત્ય પ્રત્યગાગમનં ભવેત્ ॥ ૧૧૬॥

મીનાત્તુ વૃશ્ચિકે યાતે ઉદગ્ ગચ્છતિ સઙ્કટમ્ ।
ચાપાચ્ચ મકરે યાતે સઙ્કટં જાયતે ધ્રુવમ્ ॥ ૧૧૭॥

ચાપાન્મેષે તુ યાત્રાયાં વ્યાધિર્બન્ધો મૃતિર્ભવેત્ ।
વૃશ્ચિકે તુ સુખં સમ્પત્ સ્ત્રીપ્રાપ્તિશ્ચ દ્વિજોત્તમ ॥ ૧૧૮॥

સિંહાચ્ચ કર્કટે યાતે પસ્ચિમાં વર્જયેદ્દિશમ્ ।
શુભયોગે શુભં બ્રૂયાદશુભે ત્વશુભં ફલમ્ ॥ ૧૧૯॥

શૂરશ્ચૌરશ્ચ મેષાંશે લક્ષ્મીવાંશ્ચ વૃષાંશકે ।

મિથુનાંશે ભવેજ્જ્ઞાની કર્કાંશે નૃપતિર્ભવેત્ ॥ ૧૨૦॥

સિંહાંશે રાજમાન્યશ્ચ કન્યાંશે પણ્ડિતો ભવેત્ ।
તુલાંશે રાજમન્ત્રી સ્યાદ્ વૃશ્ચિકાંશે ચ નિર્ધનઃ ॥ ૧૨૧॥

ચાપાંશે જ્ઞાનસમ્પન્નો મરકાંશે ચ પાપકૃત્ ।
કુમ્ભાંશે ચ વણિક્કર્મા મીનાંશે ધનધાન્યવાન્ ॥ ૧૨૨॥

દેહો જીવોઽથવા યુક્તો રવિભૌમાર્કિરાહુભિઃ ।
એકૈકયોગે મૃત્યુઃ સ્યાદ્ બહુયોગે તુ કા કથા ॥ ૧૨૩॥

ક્રૂરૈર્યુક્તે તનૌ રોગં જીવે યુક્તે મહદ્ ભયમ્ ।
આધી રોગો ભવેદ્ દ્વાભ્યાંઅપમૃત્યુસ્ત્રિભિર્ભવેત્ ॥ ૧૨૪॥

ચતુર્ભિર્મૃતિમાપન્નો દેહે જીવેઽશુભૈર્યુતે ।
યુગપદ્દેહજીવૌ ચ ક્રૂરગ્રહયુતૌ તદા ॥ ૧૨૫॥

રાજચોરાદિભીતિશ્ચ મૃતિશ્ચાપિ ન સંશયઃ ।
વહ્નિવાધા રવૌ જ્ઞેયા ક્ષીણેન્દૌ ચ જલાદ્ ભયમ્ ॥ ૧૨૬॥

કુજે શસ્ત્રકૃતા પીડા વાયુવાધા બુધે ભવેત્ ।
ગુલ્મવાધા શનૌ જ્ઞેયા રાહૌ કેતૌ વિષાદ્ ભયમ્ ॥ ૧૨૭॥

દેહજીવગૃહે યાતો બુધો જીવોઽથવા ભૃગુઃ ।
સુખસમ્પત્કરાઃ સર્વે રોગશોકવિનાશનાઃ ॥ ૧૨૮॥

મિશ્રગૃહૈશ્ચ સંયુક્તે મિશ્રં ફલમવાપ્નુયાત્ ।
પાપક્ષેત્રદશાકાલે દેહજીવૌ તુ દુઃખિતૌ ।
શુભક્ષેત્રદશાકાલે શુભં ભવતિ નિશ્ચિતમ્ ॥ ૧૨૯॥

શુભયુક્તાશુભક્ષેત્રદશા મિશ્રફલા સ્મૃતા ।
ક્રૂરયુક્તશુભક્ષેત્રદશા મિશ્રફલા તથા ॥ ૧૩૦॥

જનાનાં જન્મકાલે તુ યો રાશિસ્તનુભાવગઃ ।
તસ્ય ચક્રદશાકાલે દેહારોગ્યં સુખં મહત્ ॥ ૧૩૧॥

શુભે પૂર્ણસુખં પાપે દેહે રોગાદિસમ્ભવઃ ।
સ્વોચ્ચાદિગતખેટાઢ્યે રાજ્યમાનધનામયઃ ॥ ૧૩૨॥

ધનભાવે ચ યો રાશિસ્તસ્ય ચક્રદશા યદા ।
તદા સુભોજનં પુત્રસ્ત્રિસુખં ચ ધનામયઃ ॥ ૧૩૩॥

વિદ્યાપ્તિર્વાક્પટુત્વં ચ સુગોષ્ઠ્યા કાલયાપનમ્ ।
શુભર્ક્ષે ફલમેવં સ્યાત્ પાપભે ફલમન્યથા ॥ ૧૩૪॥

તૃતીયભાવરાશેસ્તુ કાલચક્રદશા યદા ।
તદા ભ્રાતૃસુખં શૌર્યં ધૈર્યં ચાપિ મહત્સુખમ્ ॥ ૧૩૫॥

સ્વર્ણાભરણવસ્ત્રાપ્તિઃ સમ્માનં રાજસંસદિ ।
શુભર્ક્ષે ફલમેવં સ્યાત્ પાપર્ક્ષે ફલમન્યથા ॥ ૧૩૬॥

સુખભાવગતર્ક્ષસ્ય કાલચક્રદશા યદા ।
તદા બન્ધુસુખં ભૂમિગૃહરાજ્યસુખાપ્તયઃ ॥ ૧૩૭॥

આરોગ્યમર્થલાભશ્ચ વસ્ત્રવાહનજં સુખમ્ ।
શુભર્ક્ષે શોભનં જ્ઞેયં પાપભે ફલમન્યથા ॥ ૧૩૮॥

સુતભાવગતર્ક્ષસ્ય કાલચક્રદશા યદા ।
સુતસ્ત્રીરાજ્યસૌખ્યાપ્તિરારોગ્યં મિત્રસંગમઃ ॥ ૧૩૯॥

વિદ્યાબુદ્ધિયશોલાભો ધૈર્યં ચ વિક્રમોદયઃ ।
શુભરાશૌ શુભં પૂર્ણં પાપર્ક્ષે ફલમન્યથા ॥ ૧૪૦॥

રિપુભાવગતર્ક્ષસ્ય કાલચક્રદશા યદા ।
તદા ચોરાદિભૂપાગ્નિવિષશસ્ત્રભયં મહત્ ॥ ૧૪૧॥

પ્રમેહગુલ્મપણ્ડ્વાદિરોગાણામપિ સંભવઃ ।
પાપર્ક્ષે ફલમેવં સ્યાત્ શુભર્ક્ષે મિશ્રમાદિશેત્ ॥ ૧૪૨॥

જાયાભાવગતર્ક્ષસ્ય કાલચક્રદશા યદા ।
તદા પાણિગ્રહઃ પત્નીપુત્રલાભાદિકં સુખમ્ ॥ ૧૪૩॥

કૃષિયોધનવસ્ત્રાપ્તિર્નૃપપૂજા મહદ્યશઃ ।
શુભરાશૌ ફલં પૂર્ણં પાપરાશૌ ચ તદ્દલમ્ ॥ ૧૪૪॥

મૃત્યુભાવસ્થિતર્ક્ષસ્ય કાલચક્રદશા તદા ।
સ્થાનનાશં મહદ્ દુઃખં બન્ધુનાશં ધનક્ષયમ્ ॥ ૧૪૫॥

દારિદ્ર્યમન્નવિદ્વેષમરિભીતિં ચ નિર્દિશેત્ ।
પાપરાશૌ ફલં પૂર્ણં શુભરાશૌ ચ તદ્દલમ્ ॥ ૧૪૬॥

ધર્મભાવગતર્ક્ષસ્ય કાલચક્રદશા યદા ।

તદા પુત્રકલત્રાર્થકૃષિગેહસુખં વદેત્ ॥ ૧૪૭॥

સત્કર્મધર્મસંસિદ્ધિં મહજ્જનપરિગ્રહમ્ ।
શુભરાશૌ શુભં પૂર્ણં પાપરાશૌ ચ તદ્ફલમ્ ॥ ૧૪૮॥

કર્મભાવગતર્ક્ષસ્ય કાલચક્રદશા યદા ।
રાજ્યાપ્તિર્ભૂપસમ્માનં પુત્રદારાદિજં સુખમ્ ॥ ૧૪૯॥

સત્કર્મફલમૈશ્વર્યં સદ્ગોષ્ઠ્યા કાલયાપનમ્ ।
શુભરાશૌ ફલં પૂર્ણં પાપરાશૌ ચ મિશ્રિતમ્ ॥ ૧૫૦॥

લાભભાવસ્થિતર્ક્ષસ્ય કાલચક્રદશા યદા ।
પુત્રસ્ત્રીબન્ધુસૌખ્યાપ્તિર્ભૂપપ્રીતિર્મહત્સુખમ્ ॥ ૧૫૧॥

ધનવસ્ત્રાપ્તિરારોગ્યં સતાં સઙ્ગશ્ચ જાયતે ।
શુભરાશૌ ફલં પૂર્ણં પાપરાશૌ ચ ખણ્ડિતમ્ ॥ ૧૫૨॥

વ્યયભાવગતર્ક્ષસ્ય કાલચક્રદશા તદા ।
ઉદ્યોગભઙ્ગમાલસ્યં દેહપીડાં પદચ્યુતિમ્ ॥ ૧૫૩॥

દારિદ્યં કર્મવૈફલ્યં તથા વ્યર્થવ્યયં વદેત્ ।
પાપરાશૌ ફલં ત્વેવં શુભરાશૌ ચ તદ્ફલમ્ ॥ ૧૫૪॥

લગ્નાદિવ્યયપર્યન્તં ભાનાં ચરદશાં બ્રુવે ।
તસ્માત્ તદીશપર્યન્તં સંખ્યામત્ર દશાં વિદુઃ ॥ ૧૫૫॥

મેષાદિત્રિત્રિભૈર્જ્ઞેયં પદમોજપદે ક્રમાત્ ।
દશાબ્દાનયને કાર્યા ગણના વ્યુત્ક્રમાત્ સમે ॥ ૧૫૬॥

વૃશ્ચિકાધિપતી દ્વૌ ચ કેતુભૌમૌ સ્મૃતૌ દ્વિજ ।
શનિરાહુ ચ કુમ્ભસ્ય સ્વામિનૌ પરિકીર્તિતો ॥ ૧૫૭॥

દ્વિનાથક્ષેત્રયોરત્ર ક્રિયતે નિર્ણયોઽધુના ।
દ્વાવેવાધિપતી વિપ્ર યુક્તૌ સ્વર્ક્ષે સ્થિતૌ યદિ ॥ ૧૫૮॥

વર્ષ દ્વાદશકં તત્ર ન ચેદેકાદિ ચિન્તયેત્ ।
એકઃ સ્વક્ષેત્રયોઽન્યસ્તુ પરત્ર યદિ સંસ્થિતઃ ॥ ૧૫૯॥

તદાઽન્યત્ર સ્થિતં નાથં પરિગૃહ્ય દશાં નયેત્ ।
દ્વાવપ્યન્યર્ક્ષગૌ તૌ ચેત્ તમોર્મધ્યે ચ યો બલી ॥ ૧૬૦॥

તત એવ દશા ગ્રાહ્યા ક્રમાદ્ વોત્ક્રમતો દ્વિજઃ ।
બલસ્યાઽત્ર વિચારે સ્યાદગ્રહાત્ સગ્રહો બલી ॥ ૧૬૧॥

દ્વાવેવ સગ્રહૌ તૌ ચેત્ બલી તત્રાધિકગ્રહઃ ।
ગ્રહયોગસમાનત્વે જ્ઞેયં રાશિબલાદ્ બલમ્ ॥ ૧૬૨॥

જ્ઞેયાશ્ચરસ્થિરદ્વન્દ્વાઃ ક્રમતો બલશાલિનઃ ।
રાશિસત્ત્વસમાનત્વે બહુવર્ષો બલી ભવેદ્ ॥ ૧૬૩॥

એકઃ સ્વોચ્ચગતશ્ચાઽન્યઃ પરત્ર યદિ સંસ્થિતઃ ।
ગૃહ્ણીયાદુચ્ચખેટસ્થં રાશિમન્યં વિહાય વૈ ॥ ૧૬૪॥

ઉચ્ચખેટસ્ય સદ્ભાવે વર્ષમેકં ચ નિક્ષિપેત્ ।
તથૈવ નીચખેટસ્ય વર્ષમેકં વિશોધયેત્ ॥ ૧૬૫॥

એવં સર્વં સમાલોચ્ય જાતકસ્ય ફલં વદેત્ ॥ ૧૬૬॥

ક્રમાદુત્ક્રમતો વાઽપિ ધર્મભાવપદક્રમાત્ ।
લગ્નરાશિં સમારભ્ય વિજ્ઞશ્ચરદશાં નયેત્ ॥ ૧૬૭॥

અથાઽહં સમ્પ્રવક્ષ્યામિ સ્થિરસંજ્ઞાં દશાં દ્વિજ ।
ચરે સપ્ત સ્થિરે ચાઽષ્ટૌ દ્વન્દ્વે નવ સમાઃ સ્મૃતાઃ ॥ ૧૬૮॥

સ્થિરત્વાચ્ચ દશાબ્દાનાં સ્થિરાખ્યેતિ નિગદ્યતે ।
બ્રહ્મખેટાશ્રિતર્ક્ષાદિર્દશેયં પરિવર્તતે ॥ ૧૬૯॥

યોઽસૌ બ્રહ્મગ્રહઃ પ્રોક્તઃ કથં સ જ્ઞાયતે મુને ।
ઇતિ સ્પષ્ટતરં બ્રૂહિ કૃપાઽસ્તિ યદિ તે મયિ ॥ ૧૭૦॥

ષષ્ઠાષ્ટવ્યયનાથેષુ યો બલી વિષમર્ક્ષગઃ ।
પૃષ્ઠસ્થિતો ભવેદ્ બ્રહ્માં બલિનો લગ્નજાયયોઃ ॥ ૧૭૧॥

કારકાદષ્ટમેશો વા બ્રહ્માઽપ્યષ્ટભાવગઃ ।
શનૌ પાતે ચ બ્રહ્મત્વે બ્રહ્મા તત્ષષ્ઠખેચરઃ ॥ ૧૭૨॥

બહવો લક્ષણક્રાન્તા જ્ઞેયસ્તેષ્વધિકાંશકઃ ।
અંશસામ્યે બલાધિક્યાદ્ વિજ્ઞેયો બ્રહ્મખેચરઃ ॥ ૧૭૩॥

યોગાર્ધે ચ દશામાનં દ્વયોર્યોગાર્ધસમ્મિતમ્ ।
લગ્નસપ્તમપ્રાણ્યાદિર્દશેયં ચ પ્રવર્તતે ॥ ૧૭૪॥

લગ્નસપ્તમયોર્મધ્યે યો રાશિર્બલવાન્ ભવેત્ ।
તતઃ કેન્દ્રાદિસંસ્થાનાં રાશીનાઞ્ચ બલક્રમાત્ ॥ ૧૭૫॥

કારકાદપિ રાશીનાં ખેટાનાં ચૈવમેવ હિ ।
દશાબ્દાશ્ચરવજ્જ્ઞેયાઃ ખેટાનાં ચ સ્વભાવધિ ॥ ૧૭૬॥

દ્વિરાશ્યધિપક્ષેટસ્ય ગણયેદુભયાવધિ ।
ઉભયોર્ધિક સંખ્યા કારકસ્ય દશા સમાઃ ॥ ૧૭૭॥

આત્મકારકમારભ્ય કારકાખ્યદશા ક્રમાત્ ।
લગ્નાત્ કારકપર્યન્તં સંખ્યામત્ર દશાં વિદુઃ ॥ ૧૭૮॥

મણ્ડૂકાપરપર્યાયા ત્રિકૂટાખ્યદશા દ્વિજ ।
લગ્નસપ્તમયોર્મધ્યે યો રાશિર્બલવાન્ ભવેત્ ॥ ૧૭૯॥

તતઃ ક્રમેણૌજરાશૌ સમે નેયા તથોઽત્ક્રમાત્ ।
ત્રિકૂટાનાં ચ વિજ્ઞેયાઃ સ્થિરવચ્ચ દશા સમાઃ ॥ ૧૮૦॥

નિર્યાણસ્ય વિચારાર્થં કૈશ્ચિચ્છૂલદશા સ્મૃતા ।
લગ્નસપ્તમતો મૃત્યુભયોર્યો બલવાન્ ભવેત્ ॥ ૧૮૧॥

તદાદિર્વિષમે વિપ્ર ક્રમાદુત્ક્રમતઃ સમે ।
દશાબ્દાઃ સ્થિરવત્તત્ર બલિમારકભે મૃતિઃ ॥ ૧૮૨॥

જન્મલગ્નત્રિકોણેષુ યો રાશિર્બલવાન્ ભવેત્ ।
તમાર્ભ્ય નયેદ્ ધીમાન્ ચરિપર્યાયવદ્ દશામ્ ॥ ૧૮૩॥

ક્રમાદુત્ક્રમતો ગ્રાહ્યં ત્રિકોણં વિષમે સમે ।
ત્રિકોણાખ્યદશા પ્રોક્તા સમા નાથાવસાનકાઃ ॥ ૧૮૪॥

લગ્નાદ્ ધર્મસ્ય તદ્દૃષ્ટરાશીનાં ચ દશાસ્તતઃ ।
દશમસ્ય ચ તદ્દૃષ્ટરાશીનાં ચ નયેત્ પુનઃ ॥ ૧૮૫॥

એકાદશસ્ય તદ્દૃષ્ટરાશીનાં સ્થિરવત્ સમાઃ ।
પ્રવૃત્તા દૃગ્ વશાદ્યસ્માદ્ દૃગ્દશેયં તતઃ સ્મૃતા ॥ ૧૮૬॥

ચરે વ્યુત્ક્રમતો ગ્રાહ્યા દૃગ્યોગ્યાઃ સ્થિરભે ક્રમાત્ ।
વિષમે ક્રમતો દ્વન્દ્વે રાશયો વ્યુત્ક્રમાત્ સમે ॥ ૧૮૭॥

ઋક્ષે લગ્નાદિરાશીનાં દશા રાશિદશા સ્મૃતા ।
ભયાતં રવિભિર્નિઘ્નં ભભોગવિહૃતં ફલમ્ ॥ ૧૮૮॥

રાશ્યાદ્યં લગ્નરાશ્યાદૌ યોજ્યં દ્વાદશશેષિતમ્ ।
તદારભ્ય ક્રમાદોજે દશા જ્ઞેયોત્ક્રમાત્ સમે ॥ ૧૮૯॥

દશાબ્દા ભુક્તભાગઘ્ના ત્રિંશતા વિહૃતાહ્ ફલમ્ ।
ભુક્તં વર્ષાદિકં જ્ઞેયં ભોગ્યં માનાદ્ વિશોધિતમ્ ॥ ૧૯૦॥

અકારાદીન્ સ્વરાન્ પઞ્ચ પ્રથમં વિન્યસેત્ ક્રમાત્ ।
કાદિહાન્તાંલ્લિખેદ્ વર્ણાન્ સ્વરાધો ઙઞણોજ્ઝિતાન્ ॥ ૧૯૧॥

તિર્યક્ પંક્તિક્રમેણૈવ પઞ્ચપઞ્ચવિભાગતઃ ।
ન પ્રોક્તા ઙઞણા વર્ણા નામાદૌ સન્તિ તે નહિ ॥ ૧૯૨॥

ચેદ્ ભવન્તિ તદા જ્ઞેયા ગજડાસ્તે યથાક્રમાત્ ।
યત્ર સ્વરે સ્વનામાદ્યવર્ણઃ સ્યાત્ તત્સ્વરાદયઃ ॥ ૧૯૩॥

ક્રમાત્ પંચ દશાધીશાઃ દ્વાદશદ્વાદશાબ્દકાઃ ।
સ્વરાણાં ચ ક્રમાજ્જ્ઞેયાઃ દશાસ્વન્તર્દશાદયઃ ॥ ૧૯૪॥

પૂર્વમેવ મયા પ્રોક્તા વર્ણદાખ્યા દશા દ્વિજ ।
ઇદાનીં શમ્ભુના પ્રોક્તા કથ્યતે યોગિની દશા ॥ ૧૯૫॥

મઙ્ગલા પિઙ્ગલા ધન્યા ભ્રામરી ભદ્રિકા તથા ।
ઉલ્કા સિદ્ધા સંકટા ચ યોગિન્યોઽષ્ટૌ પ્રકીર્તિતાઃ ॥ ૧૯૬॥

મઙ્ગલાતોઽભવચ્ચન્દ્રઃ પિઙ્ગલાતો દિવાકરઃ ।
ધન્યાતો દેવપૂજ્યોઽભૂદ્ ભ્રામરીતોઽભવત્ કુજઃ ॥ ૧૯૭॥

ભર્દિકાતો બુધો જાતસ્તથોલ્કાતઃ શનૈશ્ચરઃ ।
સિદ્ધાતો ભાર્ગવિ જાતઃ સંકટાતસ્તમોઽભવદ્ ॥ ૧૯૮॥

જન્મર્ક્ષં ચ ત્રિભિર્યુક્તં વસુભિર્ભાગમાહરેત્ ।
એકાદિશેષે વિજ્ઞેયા યોગિન્યોઃ મઙ્ગલાદિકાઃ ॥ ૧૯૯॥

એકાદ્યેકોત્તરા જ્ઞેયાઃ ક્રમાદાસાં દશાસમાઃ ।
નક્ષત્રયાતભોગાભ્યાં ભુક્તં ભોગ્યં ચ સાધયેત્ ॥ ૨૦૦॥

યેષાં યદાયુઃ સમ્પ્રોક્તં પૈણ્ડમાંશં નિસર્ગજમ્ ।
તક્ષત્ તેષાં દશા જ્ઞેયા પૈણ્ડી ચાંશી નિસર્ગજા ॥ ૨૦૧॥

બલી લગ્નાર્કચન્દ્રાણાં યત્તસ્ય પ્રથમા દશા ।

તત્કેન્દ્રાદિગતાનાં ચ જ્ઞેયા બલવશાત્તતઃ ॥ ૨૦૨॥

અષ્ટવર્ગબલેનૈષાં ફલાનિ પરિચિન્તયેત્ ।
અષ્ટવર્ગદશાશ્ચૈતાઃ કથિતાઃ પૂર્વસૂરિભિઃ ॥ ૨૦૩॥

પરાયુર્દ્વાદશો ભાગસ્તસ્ય સન્ધ્યા પ્રકીર્તિતા ।
તન્મિતા લગ્નભાદીનાં ક્રમાત્ સન્ધ્યાદશા સ્મૃતા ॥ ૨૦૪॥

સન્ધ્યા રસગુણા કાર્યા ચન્દ્રવહ્નિહૃતા ફલમ્ ।
સંસ્થાપ્યં પ્રથમે કોષ્ઠે તદર્ધં ત્રિષુ વિન્યસેત્ ॥ ૨૦૫॥

ત્રિભાગં વસુકોષ્ઠેષુ વિન્યસ્ય તત્ફલં વદેત્ ।
એવં દ્વાદશભાવેષુ પાચકાનિ પ્રકલ્પયેત્ ॥ ૨૦૬॥

વિંશત્તરિદશેવાઽત્ર કૈશ્ચિત્ તારાદશા સ્મૃતા ।
આશંકુરાગુશબુકેશ્વાદિસ્થાનેષુ તારકાઃ ॥ ૨૦૭॥

અન્મસમ્પત્વિપત્ક્ષેમપ્રત્યરિઃ સાધકો બધઃ ।
મૈત્રં પરમમૈત્રં ચ કેન્દ્રસ્થબલિનો ગ્રહાત્ ॥ ૨૦૮॥

જ્ઞેયા તારાદશા વિપ્ર નામતુલ્યફલપ્રદા ।
યસ્ય કેન્દ્રે સ્થિતઃ ખેટો દશેયં તસ્ય કીર્તિતા ॥ ૨૦૯॥

ઇતિ તે કથિતા વિપ્ર દશ ભેદા અનેકધા ।
એતદન્તર્દશાભેદાન્ કથયિષ્યામિ ચાગ્રતઃ ॥ ૨૧૦॥

## અથ દશાફલાધ્યાયઃ ॥ ૪૭॥

શ્રુતાશ્ચ બહુધા ભેદા દશાનાં ચ મયા મુને ।
ફલં ચ કીદૃશં તાસાં કૃપયા મે તદુચ્યતામ્ ॥ ૧॥

સાધારણં વિશિષ્ટઞ્ચ દશાનાં દ્વિવિધં ફલમ્ ।
ગ્રહાણાં ચ સ્વભાવેન સ્થાનસ્થિતિવશેન ચ ॥ ૨॥

ગ્રહવીર્યાનુસારેણ ફલં જ્ઞેયં દશાસુ ચ ।
આદ્યદ્રેષ્કાણગે ખેટે દશારમ્ભે ફલં વદેત્ ॥ ૩॥

દશામધ્યે ફલં વાચ્યં મધ્યદ્રેષ્કાણગે ખગે ।
અન્તે ફલં તૃતીયસ્થે વ્યસ્તં ખેટે ચ વક્રગે ॥ ૪॥

દશારમ્ભે દશાદીશે લગ્નગે શુભદૃગ્યુતે ।
સ્વોચ્ચે સ્વભે સ્વમૈત્રે વા શુભં તસ્ય દશાફલમ્ ॥ ૫॥

ષષ્ઠાઽષ્ટમવ્યયસ્થે ચ નીચાસ્તરિપુભસ્થિતે ।
અશુભં તત્ફલં ચાઽથ બ્રુવે સર્વદશાફલમ્ ॥ ૬॥

મૂલત્રિકોણે સ્વક્ષેત્રે સ્વોચ્ચે વા પરમોચ્ચગે ।
કેન્દ્રત્રિકોણલાભસ્થે ભાગ્યકર્માધિપૈર્યુતે ॥ ૭॥

સૂર્યે બલસમાયુક્તે નિજવર્ગબલૈર્યુતે ।
તસ્મિન્દાયે મહત્ સૌખ્યં ધનલાભાદિકં શુભમ્ ॥ ૮॥

અત્યન્તં રાજસન્માનમશ્વાંદોલ્યાદિકં શુભમ્ ।
સુતાધિપસમાયુક્તે પુત્રલાભં ચ વિન્દતિ ॥ ૯॥

ધનેશસ્ય ચ સમ્બન્ધે ગજાન્તૈશ્વર્યમાદિશેત્ ।
વાહનાધિપસમ્બન્ધે વાહનાત્રયલાભકૃત્ ॥ ૧૦॥

નૃપલતુષ્ટિર્વિત્તાઢ્યઃ સેનાધીશઃ સુખી નરઃ ।
વસ્ત્રવાહનલાભશ્ચ દશાયાં બલિનો રવેઃ ॥ ૧૧॥

નીચે ષડષ્ટકે  રિઃફે દુર્બલે પાપસંયુતે ।
રાહુકેતુસમાયુક્તે દુહ્સ્થાનાધિપસંયુતે ॥ ૧૨॥

તસ્મિન્દાયે મહાપીડા ધનધાન્યવિનાશકૃત ।
રાજકોપઃ પ્રવાસશ્ચ રાજદણ્ડો ધનક્ષયઃ ॥ ૧૩॥

જ્વરપીડા યશોહાનિર્બન્ધુમિત્રવિરોધકૃત ।
પિતૃક્ષયભયં ચૈવ ગૃહે ત્વશુભમેવ ચ ॥ ૧૪॥

પિતૃવર્ગે મનસ્તાપં જન્દ્વેષં ચ વિન્દતિ ।
શુભદૃષ્ટિયુતે સૂર્યે મધ્યે તસ્મિન્ ક્વચિત્સુખમ્ ।
પાપગ્રહેણ સન્દૃષ્ટે વદેત્પાપફલં બુધઃ ॥ ૧૫॥

એવં સૂર્યફલં વિપ્ર સંક્ષેપાદુદિતં મયા ।
વિંશોત્તરીમતેનાથ બ્રુવે ચન્દ્રદશાફલમ્ ॥ ૧૬॥

સ્વોચ્ચે સ્વક્ષેત્રગે ચૈવ કેન્દ્રે લાભત્રિકોણગે ।
શુભગ્રહેણ સંયુક્તે પૂર્ણે ચન્દ્રેબલૈર્યુતે ॥ ૧૭॥

કર્મભાગ્યાધિપૈર્યુક્તે વાહનેશબલૈર્યુતે ।

આદ્યન્તૈશ્વર્યસૌભાગ્યધનધાન્યાદિલાભકૃત ॥ ૧૮॥

ગૃહે તુ શુભકાર્યાણિ વાહનં રાજદર્શનમ્ ।
યત્નકાર્યાર્થસિદ્ધિઃ સ્યાદ્ ગૃહે લક્ષ્મીકટાક્ષકૃત્ ॥ ૧૯॥

મિત્રપ્રભુવશાદ્ભાગ્યં રાજ્યલાભં મહત્સુખમ્ ।
અશ્વાન્દોલ્યાદિલાભં ચ શ્વેતવસ્ત્રાદિકં લભેત્ ॥ ૨૦॥

પુત્રલાભાદિસન્તોષં ગૃહગોધનસંકુલમ્ ।
ધનસ્થાનગતે ચન્દ્રે તુઙ્ગે સ્વક્ષેત્રગેઽપિ વા ॥ ૨૧॥

અનેકધનલાભં ચ ભાગ્યવૃદ્ધિર્મહત્સુખમ્ ।
નિક્ષેપરાજસન્માનં વિદ્યાલાભં ચ વિન્દતિ ॥ ૨૨॥

નીચે વા ક્ષીણચન્દ્રે વા ધનહાનિર્ભવિષ્યતિ ।
દુશ્ચિક્યે બલસંયુક્તે ક્વચિત્સૌખ્યં ક્વચિદ્ધનમ્ ॥ ૨૩॥

દુર્બલે પાપસંયુક્તે દેહજાડ્યં મનોરુજમ્ ।
ભૃત્યપીડા વિત્તહાનિર્માતૃવર્ગજનાદ્વધઃ ॥ ૨૪॥

ષષ્ઠાષ્ટમવ્યયે ચન્દ્રે દુર્બલે પાપસંયુતે ।
રાજદ્વેષો મનોદુઃખં ધનધાન્યાદિનાશનમ્ ॥ ૨૫॥

માતૃક્લેષં મનસ્તાપં દેહજાડ્યં મનોરુજમ્ ।
દુઃસ્થે ચન્દ્રે બલૈર્યુક્તે ક્વચિલ્લાભં ક્વચિત્સુખમ્ ।
દેહજાડ્યં ક્વચિચ્ચૈવ શાન્ત્યા તત્ર શુભં દિશેત્ ॥ ૨૬॥

સ્વભોચ્ચાદિગતસ્યૈવં નીચશત્રુભગસ્ય ચ ।
બ્રવીમિ ભૂમિપુર્તસ્ય શુભાઽશુભદશાફલમ્ ॥ ૨૭॥

પરમોચ્ચગતે ભૌમે સ્વોચ્ચે મૂલત્રિકોણગે ।
સ્વર્ક્ષે કેન્દ્રત્રિકોણે વા લાભે વા ધનગેઽપિ વા ॥ ૨૮॥

સમ્પૂર્ણબલસંયુક્તે શુભદૃષ્ટે શુભાંશકે ।
રાજ્યલાભં ભૂમિલાભં ધનધાન્યાદિલાભકૃત્ ॥ ૨૯॥

આધિક્યં રાજસમ્માનં વાહનામ્બરભૂષણમ્ ।
વિદેશે સ્થાનલાભં ચ સોદરાણાં સુખં લભેત્ ॥ ૩૦॥

કેન્દ્રે ગતે સદા ભૌમે દુશ્ચિક્યે બલસંયુતે ।
પરાક્રમાદ્વિત્તલાભો યુદ્ધે શત્રુજયો ભવેત્ ॥ ૩૧॥

કલત્રપુત્રવિભવં રાજસમ્માનમેવ ચ ।
દશાદૌ સુખમાપ્નોતિ દશાન્તે કષ્ટમાદિશેત્ ॥ ૩૨॥

નીચાદિદુષ્ટભાવસ્થે ભૌમે બલવિવર્જિતે ।
પાપયુક્તે પાપદૃષ્ટે સા દશા નેષ્ટદાયિકા ॥ ૩૩॥

એવં રાહોશ્ચ કેતોશ્ચ કથયામિ ગૃહાદિકમ્ ।
તયોર્દશાફલજ્ઞપ્ત્યૈ તવાઽગ્રે દ્વિજનન્દન ॥ ૩૪॥

રાહોસ્તુ વૃષભં કેતોર્વૃશ્ચિકં તુઙ્ગસંજ્ઞકમ્ ।
મૂલત્રિકોણકં જ્ઞેયં યુગ્મં ચાપં ક્રમેણ ચ ॥ ૩૫॥

કુમ્ભાલી ચ ગૃહૌ પ્રોક્તૌ કન્યામીનૌ ચ કેનચિત્ ।
તદ્દાયે બહુસૌખ્યં ચ ધનધાન્યાદિસમ્પદામ્ ॥ ૩૬॥

મિત્રપ્રભુવશાદિષ્ટં વાહનં પુત્રસમ્ભવઃ ।
નવીનગૃહનિર્માણં ધર્મચિન્તા મહોત્સવઃ ॥ ૩૭॥

વિદેશરાજસન્માનં વસ્ત્રાલઙ્કારભૂષણમ્ ।
શુભયુક્તે શુભૈર્દૃષ્ટે યોગકારકસંયુતે ॥ ૩૮॥

કેન્દ્રત્રિકૂણલાભે વા દુશ્ચિક્યે શુભરાશિગે ।
મહારાજપ્રસાદેન સર્વસમ્પત્સુખાવહમ્ ॥ ૩૯॥

યવનપ્રભુસન્માનં ગ્રહે કલ્યાણસમ્ભવમ્ ।
રન્ધ્રે વા વ્યયગે રાહૌ તદ્દાયે કષ્ટમાદિશેત્ ॥ ૪૦॥

પાપગ્રહેણ સમ્બન્ધે મારકગ્રહસંયુતે ।
નીચરાશિગતે વાપિ સ્થાનભ્રંશો મનોવ્યથા ॥ ૪૧॥

વિનાશો દારપુત્રાણાં કુત્સિતાન્નં ચ ભોજનમ્ ।
દશાદૌ દેહપીડા ચ ધનધાન્યપરિચ્યુતિઃ ॥ ૪૨॥

દશામધ્યે તુ સૌખ્યં સ્યાત્ સ્વદેશે ધનલાભકૃત્ ।
દશાન્તે કષ્ટમાપ્નોતિ સ્થાનભ્રંશો મનોવ્યથા ॥ ૪૩॥

યઃ સર્વેષુ નાભોગેષુ બુધૈરતિશુભઃ સ્મૃતઃ ।
તસ્ય દેવેન્દ્રપૂજ્યસ્ય કથયામિ દશાફલમ્ ॥ ૪૪॥

સ્વોચ્ચે સ્વક્ષેત્રગે જીવે કેન્દ્રે લાભત્રિકોણગે ।

મૂલત્રિકોણલાભે વા તુંગાંશે સ્વાંશગેઽપિ વા ॥ ૪૫॥

રાજ્યલાભં મહાપૌરુષં રાજસન્માનકીર્તનમ્ ।
ગજવાજિસમાયુક્તં દેવબ્રાહ્મણપૂજનમ્ ॥ ૪૬॥

દારપુત્રાદિસૌખ્યં ચ વાહનાંબરલાભજમ્ ।
યજ્ઞાદિકર્મસિદ્ધિઃ સ્યાદ્વેદાન્તશ્રવણાદિકમ્ ॥ ૪૭॥

મહારાજપ્રસાદેનાઽભીષ્ટસિદ્ધિઃ સુખાવહા ।
આન્દોલિકાદિલાભશ્ચ કલ્યાણં ચ મહત્સુખમ્ ॥ ૪૮॥

પુત્રદારાદિલાભશ્ચ અન્નદાનં મહત્પ્રિયમ્ ।
નીચાસ્તપાપસંયુક્તે જીવે રિષ્ફાષ્ટસંયુતે ॥ ૪૯॥

સ્થાનભ્રંશં મનસ્તાપં પુત્રપીડામહદ્ભયમ્ ।
પશ્ચાદિધનહાનિશ્ચ તીર્થયાત્રાદિકં લભેત્ ॥ ૫૦॥

આદૌ કષ્ટફલં ચૈવ ચતુષ્પાજ્જીવલાભકૃત્ ।
મધ્યાન્તે સુખમાપ્નોતિ રાજસમ્માનવૈભવમ્ ॥ ૫૧॥

અથ સર્વેષુ ખેટેષુ યોઽતિહીનઃ પ્રકીર્તિતઃ ।
તસ્ય ભાસ્કરપુત્રસ્ય કથયામિ દશાફલમ્ ॥ ૫૨॥

સ્વોચ્ચે સ્વક્ષેત્રગે મન્દે મિત્રક્ષેત્રેઽથ વા યદિ ।
મૂલત્રિકોણે ભાગ્યે વા તુંગાંશે સ્વાંશગેઽપિ વા ॥ ૫૩॥

દુશ્ચિક્યે લાભગે ચૈવ રાજસમ્માનવૈભવમ્ ।
સત્કીર્તિર્ધનલાભશ્ચ વિદ્યાવાદવિનોદકૃત્ ॥ ૫૪॥

મહારાજપ્રસાદેન ગજવાહનભૂષણમ્ ।
રાજયોગં પ્રકુર્વીત સેનાધીશાન્મહત્સુખમ્ ॥ ૫૫॥

લક્ષ્મીકટાક્ષચિહ્નાનિ રાજ્યલાભં કરોતિ ચ ।
ગૃહે કલ્યાણસમ્પત્તિર્દારપુત્રાદિલાભકૃત્ ॥ ૫૬॥

ષષ્ઠાષ્ટમવ્યયે મન્દે નીચે વાઽસ્તઙ્ગતેઽપિ વા ।
વિષશસ્ત્રાદિપીડા ચ સ્થાભ્રંશં મહદ્ભયમ્ ॥ ૫૭॥

પિતૃમાતૃવિયોગં ચ દારપુત્રાદિપીડનમ્ ।
રાજવૈસ્ઃઅમ્યકાર્યાણિ હ્યનિષ્ટં બન્ધનં તથા ॥ ૫૮॥

શુભયુક્તેક્ષિતે મન્દે યોગકારકસંયુતે ।
કેન્દ્રત્રિકોણલાભે વા મીનગે કાર્મુકે શનૌ ॥ ૫૯॥

રાજ્યલાભં મહોત્સાહં ગજશ્વામ્બરસંકુલમ્ ॥ ૬૦॥

અથ સર્વનભોગેષુ યઃ કુમારઃ પ્રકીર્તિતઃ ।
તસ્ય તારેશપુત્રસ્ય કથયામિ દશાફલમ્ ॥ ૬૧॥

સ્વોચ્ચે સ્વક્ષેત્રસંયુક્તે કેન્દ્રલાભત્રિકોણગે ।
મિત્રક્ષેત્રસમાયુક્તે સૌમ્યે દાયે મહત્સુખમ્ ॥ ૬૨॥

ધનધાન્યાદિલાભં ચ સત્કીર્તિધનસમ્પદામ્ ।
જ્ઞાનાધિક્યં નૃપપ્રીતિં સત્કર્મગુણવર્દ્ધનમ્ ॥ ૬૩॥

પુત્રદારાદિસૌખ્યં ચ દેહારોગ્યં મહત્સુખમ્ ।
ક્ષીરેણ ભોજનં સૌખ્યં વ્યાપારાલ્લભતે ધનમ્ ॥ ૬૪॥

શુભદૃષ્ટિયુતે સૌમ્યે ભાગ્યે કર્માધિપે દશા ।
આધિપત્યે બલવતી સમ્પૂર્ણફલદાદિકા ॥ ૬૫॥

પાપગ્રહયુતે દૃષ્ટે રાજદ્વેષં મનોરુજમ્ ।
બન્ધુજનવિરોધં ચ વિદેશગમનં લભેત્ ॥ ૬૬॥

પરપ્રેષ્યં ચ કલહં મૂર્તકૃચ્છ્રાન્મહન્ભયમ્ ।
ષષ્ઠાષ્ટમવ્યયે સૌમ્યે લાભભોગાર્થનાશનમ્ ॥ ૬૭॥

વાતપીડાં ધનં ચૈવં પાણ્ડુરોગં વિનિર્દિશેત્ ।
નૃપચૌરાગ્નિભીતિં ચ કૃષિગોભૂમિનાશનમ્ ॥ ૬૮॥

દશાદૌ ધનધાન્યં ચ વિદ્યાલાભં મહત્સુખમ્ ।
પુત્રકલ્યાણસમ્પત્તિઃ સન્માર્ગે ધનલાભકૃત્ ॥ ૬૯॥

મધ્યે નરેન્દ્રસન્માનમન્તે દુઃખં ભવિષ્યતિ ॥ ૭૦॥

યસ્તમોગ્રહયોર્મધ્યે કબન્ધઃ કથ્યતે બુધૈઃ ।
તસ્ય કેતોરિદાનીં તે કથેયામિ દશાફલમ્ ॥ ૭૧॥

કેન્દ્રે લાભે ત્રિકોણે વ શુભરાશૌ શુભેક્ષિતે ।
સ્વોચ્ચે વા શુભવર્ગે વા રાજપ્રીતિં મનોનુગમ્ ॥ ૭૨॥

દેશાગ્રામાધિપત્યં ચ વાહનં પુત્રસમ્ભવમ્ ।

દેશાન્તરપ્રયાણં ચ નિર્દિશેત્ તત્ સુખાવહમ્ ॥ ૭૩॥

પુત્રદારસુખં ચૈવ ચતુષ્પાજ્જીવલાભકૃત્ ।
દુશ્ચિક્યે ષષ્ઠલાભે વા કેતુર્દાયે સુખં દિશેત્ ॥ ૭૪॥

રાજ્યં કરોતિ મિત્રાંશં ગજવાજિસમન્વિતમ્ ।
દશદૌ રાજયોગશ્ચ દશામધ્યે મહદ્ભયમ્ ॥ ૭૫॥

અન્તે દૂરાટનં ચૈવ દેહવિશ્રમણં તથા ।
ધને રન્ધ્રે વ્યયે કેતૌ પાપદૃષ્ટિયુતેક્ષિતે ॥ ૭૬॥

નિગડં બન્ધુનાશં ચ સ્થાનભ્રંશં મનોરુજમ્ ।
શૂદ્રસઙ્ગાદિલાભં ચ કુરુતે રોગસંકુલમ્ ॥ ૭૭॥

અથ ભૂતેષુ યઃ શુક્રા મદરૂપેણ તિષ્ઠતિ ।
તસ્ય દૈત્યગુરોર્વિપ્ર કથયામિ દશાફલમ્ ॥ ૭૮॥

પરમોચ્ચગતે શુક્રે સ્વોચ્ચે સ્વક્ષેત્રકેન્દ્રગે ।
નૃપાઽભિષેકસમ્પ્રાપ્તિર્વાહનાઽમ્બરભૂષણમ્ ॥ ૭૯॥

ગજાશ્વપશુલાભં ચ નિત્યં મિષ્ટાન્નભોજનમ્ ।
અખણ્ડમણ્ડલાધીશારાજસન્માનવૈભવમ્ ॥ ૮૦॥

મૃદઙ્ગવાદ્યઘોષં ચ ગૃહે લક્ષ્મીકટાક્ષકૃત્ ।
ત્રિકોણસ્થે નિજે તસ્મિન્ રાજ્યાર્થગૃહહસમ્પદઃ ॥ ૮૧॥

વિવાહોત્સવકાર્યાણિ પુત્રકલ્યાણવૈભવમ્ ।
સેનાધિપત્યં કુરુતે ઇષ્ટબન્ધુસમાગનમ્ ॥ ૮૨॥

નષ્ટરાજ્યાદ્ધનપ્રાપ્તિં ગૃહે ગોધનસઙ્ગ્રહમ્ ।
ષષ્ઠાષ્ટમવ્યયે શુક્રે નીચે વા વ્યયરાશિગે ॥ ૮૩॥

આત્મબન્ધુજનદ્વેષં દારવર્ગાદિપીડનમ્ ।
વ્યવસાયાત્ફલં નષ્ટં ગોમહિષ્યાદિહાનિકૃત્ ॥ ૮૪॥

દારપુત્રાદિપીડા વા આત્મબન્ધુવિયોગકૃત્ ।
ભાગ્યકર્માધિપત્યેન લગ્નવાહનરાશિગે ॥ ૮૫॥

તદ્દશાયાં મહત્સૌખ્યં દેશગ્રામાધિપાલતા ।
દેવાલયતડાગાદિપુણ્યકર્મસુ સંગ્રહઃ ॥ ૮૬॥

અન્નદાને મહત્સૌખ્યં નિત્યં મિષ્ટાન્નભોજનમ્ ।
ઉત્સાહઃ કીર્તિસમ્પત્તી સ્ત્રીપુત્રધનસમ્પદઃ ॥ ૮૭॥

સ્વભુક્તૌ ફલમેવં સ્યાદ્બલાન્યન્યાનિ ભુક્તિષુ ।
દ્વિતીયદ્યૂનનાથે તુ દેહપીડા ભવિષ્યતિ ॥ ૮૮॥

તદ્દોષપરિહારાર્થં રુદ્રં વા ત્ર્યમ્બકં જપેત્ ।
સ્વેતાં ગાં મહિષીં દવ્યાદારોગ્યં ચ તતો ભવેત્ ॥ ૮૯॥

---

## અથ વિશેષનક્ષત્રદશાફલાધ્યાયઃ ॥ ૪૮॥

સ્થાનસ્થિતિવશેનૈવં ફલં પ્રોક્તં પુરાતનૈઃ ।
મિથો ભાવેશસમ્બન્ધાત્ફલાનિ કથયામ્યહમ્ ॥ ૧॥

લગ્નેશસ્ય ગશાકાલે સત્કીર્તિર્દેહજં સુખમ્ ।
ધનેશસ્ય દશાયાં તુ ક્લેશો વા મૃત્યુતો ભયમ્ ॥ ૨॥

સહજેશદશાકાલે જ્ઞેયં પાપફલં નૃણામ્ ।
સુખાધીશદશાયાં તુ ગૃહભૂમિસુખં ભવેત્ ॥ ૩॥

પઞ્ચમેશસ્ય પાકે ચ વિદ્યાપ્તિઃ પુત્રજં સુખમ્ ।
રોગેશસ્ય દશાકાલે દેહપીડા રિપોર્ભયમ્ ॥ ૪॥

સપ્તમેશસ્ય પાકે તુ સ્ત્રીપીડા મૃત્યુતો ભયમ્ ।
અષ્ટમેશદશાકાલે મૃત્યુભીતિર્ધનક્ષતિઃ ॥ ૫॥

ધર્મશસ્ય દશાયાં ચ ભૂરિલ્લાભો યશઃસુખમ્ ।
દશમેશદશાકાલે સમ્માનં નૃપસંસદિ ॥ ૬॥

લાભેશસ્ય દશાકાલે લાભે બાધા રુજોભયમ્ ।
વ્યયેશસ્ય દશા નૃણાં બહુકષ્ટપ્રદા દ્વિજ ॥ ૭॥

દશારમ્ભે શુભસ્થાને સ્થિતસ્યાપિ શુભં ફલમ્ ।
અશુભસ્થાનગસ્યૈવં શુભસ્યાપિ ન શોભનમ્ ॥ ૮॥

પઞ્ચમેશેન યુક્તસ્ય કર્મેશસ્ય દશા શુભા ।
નવમેશેન યુક્તસ્ય કર્મેશસ્યાતિશભના ॥ ૯॥

પઞ્ચમેશેન યુક્તસ્ય ગ્રહસ્યાપિ દશા શુભા ।
તથા ધર્મપયુક્તસ્ય દશા પરમશોભના ॥ ૧૦॥

સુખેશસહિતસ્યાપિ ધર્મેશસ્ય દશા શુભા ।
પઞ્ચમસ્થાનગસ્યાપિ માનેશસ્ય દશાશુભા ॥ ૧૧॥

એવં ત્રિકોણનાથાનાં કેન્દ્રસ્થાનાં દશાઃ શુભાઃ ।
તથા કોણસ્થિતાનાં ચ કેન્દ્રેશાનાં દશાઃ શુભાઃ ॥ ૧૨॥

કેન્દ્રેશઃ કોણભાવસ્થઃ કોણેશઃ કેન્દ્રગો યદિ ।
તયોર્દશાં શુભાં પ્રાહુર્જ્યોતિઃશાસ્ત્રવિદો જનાઃ ॥ ૧૩॥

ષષ્ઠાષ્ટમવ્યયાધીશા અપિ કોણેશસંયુતા ।
તેષાં દશાઽપિ શુભદા કથિતા કાલકોવિદૈઃ ॥ ૧૪॥

કોણેશો યદિ કેમ્દ્રસ્થઃ કેન્દ્રેશો યદિ કોણગઃ ।
તાભ્યાં યુક્તસ્ય ખેટસ્ય દૃષ્ટિયુક્તસ્ય ચૈતયોઃ ॥ ૧૫॥

દશાં શુભપ્રદાં પ્રાહુર્વિદ્વાંસો દૈવચિન્તકાઃ ।
લગ્નેશો ધર્મભાવસ્થો ધર્મેશો લગ્નગો યદિ ॥ ૧૬॥

એતયોસ્તુ દશાકાલે સુખધર્મસમુદ્ભવઃ ।
કર્મેશો લગ્નરાશિસ્થો લગ્નેશઃ કર્મભાવગઃ ॥ ૧૭॥

તયોર્દશાવિપાકે તુ રાજ્યલાભો ભવેદ્ધ્રુવમ્ ।
ત્રિષડાયગતાનાં ચ ત્રિષડાયાધિપૈર્યુજમ્ ॥ ૧૮॥

શુભાનામપિ ખેટાનાં દશા પાપફલપ્રદા ।
મારકસ્થાનગાનાં ચ મારકેશયુજામપિ ॥ ૧૯॥

રન્ધ્રસ્થાનગતાનાં ચ દશાઽનિષ્ટફલપ્રદા ।
એવં ભાવેશસમ્બન્ધાદૂહ્નીયં દશાફલમ્ ॥ ૨૦॥

## અથ કાલચક્રદશાફલાધ્યાયઃ ॥ ૪૯॥

કથયામ્યથ વિપ્રેન્દ્ર કાલચક્રદશાફલમ્ ।
તત્રાદૌ રાશિનાથાનાં સૂર્યાદીનાં ફલં બ્રુવે ॥ ૧॥

રક્તપિત્તાદિતો વ્યાધિં નૃણામર્કફલં વદેત્ ।
ધનકીર્તિપ્રજાવૃદ્ધિવસ્ત્રાભરણદઃ શશી ॥ ૨॥

જ્વરમાશુ દિશેત્ પૈત્ત્યં ગ્રન્થિસ્ફોટં કુજસ્તથા ।

પ્રજાનાં ચ ધનાનાં ચ સદા વૃદ્ધિં બુધો દિશેત્ ॥ ૩॥

ધનં કીર્તિં પ્રજાવૃદ્ધિં નાનાભોગં બૃહસ્પતિઃ ।
વિદ્યાવૃદ્ધિર્વિવાહશ્ચ ગૃહં ધાન્યં ભૃગોઃ ફલમ્ ॥ ૪॥

તાપાધિક્યં મહદ્દુઃખં બન્ધુનાશઃ શનેઃ ફલમ્ ।
એવમર્કાદિયોગેન વદેદ્રાશિદશાફલમ્ ॥ ૫॥

મેષે તુ રક્તપીડા ચ વૃષભે ધાન્યવર્દ્ધનમ્ ।
મિથુને જ્ઞાનસમ્પાન્નશ્ચાન્દ્રે ધનપતિર્ભવેત્ ॥ ૬॥

સૂર્યક્ષે શત્રુબાધા ચ કન્યા સ્ત્રીણાં ચ નાશનમ્ ।
તાલિકે રાજમન્ત્રિત્વં વૃશ્ચિકે મરણં ભવેત્ ॥ ૭॥

અર્થલાભો ભવેચ્ચાપે મેષસ્ય નવભાગકે ।
મકરે પાપકર્માણિ કુમ્ભે વાણિજ્યમેવ ચ ॥ ૮॥

મીને સર્વાર્થસિદ્ધિશ્ચ વૃશ્ચિકેષ્વગ્નિતો ભયમ્ ।
તૌલિકે રાજપૂજ્યશ્ચ કન્યાયાં શત્રુવર્ધનમ્ ॥ ૯॥

શશિભે દારસમ્બાધા સિંહે ચ ત્વક્ષિરોગકૃત્ ।
મિથુને વૃત્તિબાધા સ્યાદ્વૃષભસ્ય નવાંશકે ॥ ૧૦॥

વૃષભે ત્વર્થલાભાશ્ચ મેષે તુ જ્વરરોગકૃત્ ।
મીને તુ માતુલપ્રીતિઃ કુમ્ભે શત્રુપ્રવર્દ્ધનમ્ ॥ ૧૧॥

મૃગે ચૌરસ્ય સમ્બાધા ધનુષિ શસ્ત્રવર્ધનમ્ ।
મેષે તુ શસ્ત્રસંઘાતો વૃષભે કલહો ભવેત્ ॥ ૧૨॥

મિથુને સુખમાપ્નોતિ મિથુનસ્ય નવાંશકે ।
કર્કટે સઙ્કટપ્રાપ્તિઃ સિંહે રાજપ્રકોપકૃત્ ॥ ૧૩॥

કન્યાયાં ભ્રાતૃપૂજા વ તૌલિકે પ્રિયકૃન્નરઃ ।
વૃશ્ચિકે પિતૃબાધા સ્યાત્ ચાપે જ્ઞાનધનોદયઃ ॥ ૧૪॥

મકરે જલભીતિઃ સ્યાત્ કુમ્ભે ધાન્યવિવર્ધનમ્ ।
મીને ચ સુખસમ્પત્તિઃ કર્કટસ્ય નવાંશકે ॥ ૧૫॥

વૃશ્ચિકે કલઃ પીડા તૌલિકે હ્યધિકં ફલમ્ ।
કન્યાયામતિલાભશ્ચ શશાંકે મૃગબાધિકા ॥ ૧૬॥

સિંહે ચ પુત્રલાભશ્ચ મિથુને શત્રુવર્દ્ધનમ્ ।
વૃષેઃ ચતુષ્પદાલ્લાભો મેષાંશે પશુતો ભયમ્ ।
મીને તુ દીર્ઘયાત્રા સ્યાત્ સિંહસ્ય નવભાગકે ॥ ૧૭॥

કુમ્ભે તુ ધનલાભશ્ચ મકરે દ્રવ્યલાભકૃત્ ।
ધનુષિ ભ્રાતૃસંસર્ગો મેષે માતૃવિવર્દ્ધનમ્ ॥ ૧૮॥

વૃષભે પુત્રવૃદ્ધિઃ સ્યાન્મિથુને શત્રુવર્દ્ધનમ્ ।
શશિભે તુ સ્ત્રિયાં પ્રીતિઃ સિંહે વ્યાધિવિવર્દ્ધનમ્ ॥ ૧૯॥

કન્યાયાં પુત્રવૃદ્ધિઃ સ્યાત્કન્યાયા નવમાંશકે ।
તુલાયામર્થલાભશ્ચ વૃશ્ચિકે ભ્રાતૃવર્દ્ધનમ્ ॥ ૨૦॥

ચાપે ચ તાતસૌખ્યં ચ મૃગે માતૃવિરોધિતા ।
કુમ્ભે પુત્રાર્થલાભશ્ચ મીને શત્રુવિરોધિતા ॥ ૨૧॥

અલૌ જાયાવિરોધશ્ચ તુલે ચ જલબાધતા ।
કન્યાયાં ધનવૃદ્ધિઃ સ્યાત્ તુલાયા નવભાગકે ॥ ૨૨॥

કર્કટે હ્યર્થનાશશ્ચ સિંહે રાજવિરોધિતા ।
મિથુને ભૂમિલાભશ્ચ વૃષભે ચાઽર્થલાભકૃત્ ॥ ૨૩॥

મેષે સર્પાદિભીતિઃ સ્યાન્મીને ચૈવ જલાદ્ ભયમ્ ।
કુમ્ભે વ્યાપારતો લાભો મકરેઽપિ રુજો ભયમ્ ॥ ૨૪॥

ચાપે તુ ધનલાભઃ સ્યાદ્ વૃશ્ચિકસ્ય નવાંશકે ।
મેષે તુ ધનલાભઃ સ્યાદ્ વૃષે ભૂમિવિવર્દ્ધનમ્ ॥ ૨૫॥

મિથુને સર્વસિદ્ધિઃ સ્યાત્કર્કટે સર્વસિદ્ધિકૃત્ ।
સિંહે તુ પૂર્વવૃદ્ધિઃ સ્યાત્કન્યાયાં કલહો ભવેત્ ॥ ૨૬॥

તૌલિકે ચાર્થલાભઃ સ્યાદ્ વૃશ્ચિકે રૂગમાપ્નુયાત્ ।
ચાપે તુ સુતવૃદ્ધિઃ સ્યાચ્ચાપસ્ય નવમાંશકે ॥ ૨૭॥

મકરે પુત્રલાભઃ સ્યાત્કુમ્ભે ધાન્યવિવર્દ્ધનમ્ ।
મીને કલ્યાણમાપ્નોતિ વૃશ્ચિકે વિષબાધિતા ॥ ૨૮॥

તૌલિકે ત્વર્થલાભશ્ચ કન્યાયાં શત્રુવર્દ્ધનમ્ ।
શશિભે સ્૨/ઇયમાપ્નોતિ સિંહે તુ મૃગબાધિતા ॥ ૨૯॥

મિથુને વૃક્ષબાધા ચ મૃગસ્ય નવભાગકે ।

વૃષભે ત્વર્થલાભશ્ચ મેષભે ત્વક્ષિરોગકૃત્ ॥ ૩૦॥

મીને તુ દીર્ઘયાત્રા સ્યાત્કુમ્ભે ધનવિવર્દ્ધનમ્ ।
મકરે સર્વસિદ્ધિઃ સ્યાચ્ચાપે શત્રુવિવર્દ્ધનમ્ ॥ ૩૧॥

મેષે સૌખ્યવિનાશશ્ચ વૃષભે મરણં ભવેત્ ।
યુગ્મે કલ્યાણમાપ્નોતિ કુમ્ભસ્ય નવમાંશકે ॥ ૩૨॥

કર્કટે ધનવૃદ્ધિઃ સ્યાત્ સિંહે તુ રાજપૂજનમ્ ।
કન્યાયામર્થલાભસ્તુ તુલાયાં લાભમાપ્નુયાત્ ॥ ૩૩॥

વૃશ્ચિકે જ્વરમાપ્નોતિ ચાપે શત્રુવિવર્દ્ધનમ્ ।
મૃગે જાયાવિરોધશ્ચ કુમ્ભે જલવિરોધતા ॥ ૩૪॥

મીને તુ સર્વસૌભાગ્યં મીનસ્ય નવભાગકે ।
દશાંશક્રમેણૈવં જ્ઞાત્વા સર્વફલં વદેત્ ॥ ૩૫॥

ક્રૂરગ્રહદશાકાલે શાન્તિં કુર્યાદ્વિચક્ષણઃ ।
યત્ પ્રોક્તં રાજયોગાદૌ સંજ્ઞાધ્યાયે ચ યત્ ફલમ્ ॥ ૩૬॥

તત્સર્વં ચત્રકાલે હિ સુબુદ્ધ્યા યોજયેદ્ બુધઃ ।
ઇતિ સંક્ષેપતઃ પ્રોક્તં કાલચક્રદશાફલમ્ ॥ ૩૭॥

---

## અથ ચરાદિદશાફલાધ્યાયઃ ॥ ૫૦॥

ચરસ્થિરાદિસંજ્ઞા યા દશાઃ પ્રોક્તાઃ પુરા દ્વિજ ।
શુભાઽશુભફલં તાસાં કથયામિ તવાઽગ્રતઃ ॥ ૧॥

લગ્નાદિદ્વાદશાન્તાનાં ભાવાનાં ફલકીર્તને ।
તત્તદ્રાશીશવીર્યેણ યથાયોગ્યં પ્રયોજયેત્ ॥ ૨॥

બલયુક્તે ચ રાશીશે પૂર્ણં તસ્ય તદા ફલમ્ ।
ફલં મધ્યબલે મધ્યં બલહીને વિપર્યયઃ ॥ ૩॥

યો યો દશાપ્રદો રાશિસ્તસ્ય રન્ધ્રત્રિકોણકે ।
પાપખેટયુતે વિપ્ર તદ્દશા દુઃખદાયિકા ॥ ૪॥

તૃતીયષષ્ઠગે પાપે જયાદિઃ પરિકીર્તિતઃ ।
શુભખેટયુતે તત્ર જાયતે ચ પરાજયઃ ॥ ૫॥

લાભસ્થે ચ શુભે પાપે લાભો ભવતિ નિશ્ચિતઃ ।
યદા દશાપ્રદો રાશિઃ શુભખેટયુતો દ્વિજ ॥ ૬॥

શુભક્ષેત્રે હિ તદ્રાશેઃ શુભં જ્ઞેયં દશાફલમ્ ।
પાપયુક્તે શુભક્ષેત્રે પૂર્વં શુભમસત્પરે ॥ ૭॥

પાપર્ક્ષે શુભસંયુક્તે પૂર્વં સૌખ્યં તતોઽશુભમ્ ।
પાપક્ષેત્રે પાપયુક્તે સા દશા સર્વદુખદા ॥ ૮॥

શુભક્ષેત્રદશા રાશૌ યુક્તે પાપશુભૈર્દ્વિજ ॥ ૯॥

પૂર્વં કષ્ટં સુખં પશ્ચાન્નિર્વિશઙ્કં પ્રજાયતે ।
શુભક્ષેત્રે શુભં વાચ્યં પાપર્ક્ષે ત્વશુભં ફલમ્ ॥ ૧૦॥

દ્વિતીયે પઞ્ચમે સૌમ્યે રાજપ્રીતિર્જયો ધ્રુવમ્ ।
પાપે તત્ર ગતે જ્ઞેયમશુભં તદ્દશાફલમ્ ॥ ૧૧॥

ચતુર્થે તુ શુભં સૌખ્યમારોગ્યં ત્વષ્ટમે શુભે ।
ધર્મવૃદ્ધિર્ગુરુજનાત્સૌખ્યં ચ નવમે શુભે ॥ ૧૨॥

વિપરીતે વિપર્યાસો મિશ્રે મિશ્રં પ્રકીર્તિતમ્ ।
પાકે ભોગે ચ પાપાઢ્યે દેહપીડા મનોવ્યથા ॥ ૧૩॥

સપ્તમે પાકભોગાભ્યાં પાપે દારાર્તિરીરિતા ।
ચતુર્થે સ્થાનહાનિઃ સ્યાત્પઞ્ચમે પુત્રપીડનમ્ ॥ ૧૪॥

દશમે કીર્તિહાનિઃ સ્યાન્નવમે પિતૃપીડનમ્ ।
પાકાદ્રુદ્રાગતે પાપે પીડા સર્વાપ્યબાધિકા ॥ ૧૫॥

ઉક્તસ્થાનગતે સૌમ્યે તતઃ સૌખ્યં વિનિર્દિશેત્ ।
કેન્દ્રસ્થાનગતે સૌમ્યે લાભઃ શત્રુજપપ્રદઃ ॥ ૧૬॥

જન્મકાલગ્રહસ્થિત્યા સગોચગગ્રહૈરપિ ।
વિચારિતૈઃ પ્રવક્તવ્યં તત્તદ્રાશિદ/સાફલમ્ ॥ ૧૭॥

યશ્ચ રાશિઃ શુભાકાન્તો યસ્ય પશ્ચાચ્છુભગ્રહાઃ ।
તદ્દશા શુભદા પ્રોક્તા વિપરીતે વિપર્યયઃ ॥ ૧૮॥

ત્રિકોણરન્ધ્રરિષ્ફસ્થૈઃ શુભપાપૈઃ શુભાઽશુભમ્ ।
તદ્દશાયાં ચ વક્તવ્યં ફલં દૈવવિદા સદા ॥ ૧૯॥

મેષકર્કતુલાનક્રરાશીનાં ચ યથાક્રમમ્ ।
બાધા સ્તાનાનિ સમ્પ્રોક્તા કુભગોસિંહવૃશ્ચિકાઃ ॥ ૨૦॥

પાકેશાક્રાન્તરાશૌ વા બાધાસ્થાને શુભેતરે ।
સ્થિતે સતિ મહાશોકો બન્ધનવ્યસનામયાઃ ॥ ૨૧॥

ઉચ્ચસ્વર્ક્ષગ્રહે તસ્મિઞ્છુભં સૌખ્યં ધનાગમઃ ।
તચ્છૂન્યં ચેદસૌખ્યં સ્યાત્તદ્દશા ન ફલપ્રદા ॥ ૨૨॥

બાધકવ્યયષડરન્ધ્રે રાહુયુક્તે મહદ્ભયમ્ ।
પ્રસ્થાને બન્ધનપ્રાપ્તી રાજપીડા રિપોભયમ્ ॥ ૨૩॥

રવ્યારરાહુશનયો ભુક્તિરાશૌ સ્થિતા યદિ ।
તદ્રાશિભિક્તૌ પતનં રાજકોપાન્ મહદ્ભયમ્ ॥ ૨૪॥

ભુક્તિરાશિત્રિકોણે તુ નીચખેટઃ સ્થિતો યદિ ।
તદ્રાશૌ વા યુતે નીચે પાપે મૃત્યુભયં વદેત્ ॥ ૨૫॥

ભુક્તિરાશૌ સ્વતુઙ્ગસ્થે ત્રિકોણે વાપિ ખેચરે ।
યદા ભુક્તિદશા પ્રાપ્તા તદા સૌખ્યં લભેન્નરઃ ॥ ૨૬॥

નગરગ્રામનાથત્વં પુત્રલાભં ધનાગમમ્ ।
કલ્યાણં ભૂરિભાગ્યં ચ સેનપત્યં મહોન્નતમ્ ॥ ૨૭॥

પાકેશ્વરો જીવદૃષ્ટઃ શુભરાશિસ્થિતો યદિ ।
તદ્દશાયાં ધનપ્રાપ્તિર્મઙ્ગલં પુત્રસમ્ભવમ્ ॥ ૨૮॥

સિતાસિતભયુગ્માશ્ચ સૂર્યસ્ય રિપુરાશયઃ ।
કૌર્પિતૌલિઘટાશ્ચેન્દ્રોર્ભૌમસ્ય રિપુરાશયઃ ॥ ૨૯॥

ઘટમીનનૃયુક્તૌલિકન્યા જ્ઞસ્ય તતઃ પરમ્ ।
કર્કમીનાલિકુમ્ભાશ્ચ રાશયો રિપવઃ સ્મૃતાઃ ॥ ૩૦॥

વૃષતૌલિનૃયુક્કન્યારાશયો રિપવો ગુરોઃ ।
સિંહાલિકર્કચાપાશ્ચ શુક્રસ્ય રિપુરાશયઃ ॥ ૩૧॥

મેષસિંહધનુઃકૌર્પિકર્કટા શનિશત્રવઃ ।
એવં ગ્રાહન્તરદાશાં ચિન્તયેત્કોવિદો દ્વિજ ॥ ૩૨॥

યે રાજયોગદા યે ચ શુભમધ્યમતા ગ્રહાઃ ।
યસ્માદ્વા દ્વિત્રિતુર્યસ્થાઃ ગ્રહાઃ શુભફલપ્રદાઃ ॥ ૩૩॥

તદ્દશાનાં શુભં બ્રૂયાદ્રાજયોગાદિસમ્ભવમ્ ।
શુભદ્વયાન્તરગતઃ પાપોઽપિ શુભદઃ સ્મૃતઃ ॥ ૩૪॥

ગતા શુભદશામધ્યં દશા સૌમ્યસ્ય શોભના ।
શુભા યસ્ય ત્રિકોણસ્થસ્તદ્દશાપિ શુભપ્રદા ॥ ૩૫॥

આરમ્ભાન્તો મિત્રશુભરાશ્યોર્યદિ ફલં શુભમ્ ।
પ્રતિરાશ્યૈવમવ્દાદ્યં વિભજ્ય તત્ફલં વદેત્ ॥ ૩૬॥

આરમ્ભાત્તત્ત્રિકોણે તુ સૌમ્યે તુ શુભભાવહેત્ ।
શુભરાશૌ શુભારમ્ભે દશા સ્યાદતિશોભના ॥ ૩૭॥

શુભાદિરાશૌ પાપશ્ચેદ્દશારમ્ભે શુભા સ્મૃતા ।
શુભારમ્ભે કથા કેતિ પ્રારમ્ભસ્ય ફલં વદેત્ ॥ ૩૮॥

આરમ્ભે પાપરાશૌ વા યદીશો દુર્બલો દ્વિજ ।
નીચાદૌ તદ્દશાદ્યન્તે વદેદ્ભાગ્યવિપર્યયમ્ ॥ ૩૯॥

યત્ર સ્થિતો નીચખેટસ્ત્રિકોણે વાઽથ નીચગઃ ।
તથા રાશીશ્વરે નીચે સમ્બન્ધો નીચખેટકૈઃ ॥ ૪૦॥

ભાગ્યસ્ય વિપરીતત્વં કરોત્યેવ દ્વિજોત્તમ ।
ધનધાન્યાદિહાનિશ્ચ દેહે રોગભયં તથા ॥ ૪૧॥

રાહોઃ કેતોશ્ચ કુમ્ભાદિ વૃશ્ચિકાદિ ચતુષ્ટયમ્ ।
સ્વભં તત્ર સમારમ્ભસ્તદ્દશાયાં શુભં ભવેત્ ॥ ૪૨॥

યદ્દશાયાં શુભં બ્રૂયાત્સ ચેન્મારકસંસ્થિતઃ ।
યસ્મિન્ રાશૌદશાન્તઃસ્યાત્તસ્મિન્ દૃષ્ટે યુતેઽપિ વા ॥ ૪૩॥

શુક્રેણ વિધુના વા સ્યાદ્રાજકોપાદ્ધનક્ષયઃ ।
દશાન્તશ્ચેદરિક્ષેત્રે રાહુદૃષ્ટયુતેઽપિ વા ॥ ૪૪॥

ઇદં ફલં શનેઃ પાકે ન વિચિન્ત્યં દ્વિજોત્તમ ।
દશાપ્રદે નક્રરાશૌ ન વિચિન્ત્યમિદં ફલમ્ ॥ ૪૫॥

રાહુર્દશાન્તે સર્વસ્વનાશો મરણબન્ધને ।
દશાન્નિર્વાસનં વા સ્યાત્કષ્ટં વા મહદશ્રુતે ॥ ૪૬॥

તત્ત્રિકોણગતે પાપે નિશ્ચયાદ્દુઃખમાદિશેત્ ।

એવં શુભાશુભં સર્વં નિશ્ચયેન વદેદ્ બુધઃ ॥ ૪૭॥

રાહ્વાદ્યાશ્રિતરાશિસ્તુ ભવેદ્યદિ દશાપ્રદઃ ।
તત્ર કાલેઽપિ પૂર્વોક્તં ચિન્તનીયં પ્રયત્નતઃ ॥ ૪૮॥

દ/સારમ્ભો દશાન્તો વા મારકે ચેન્ન શોભનમ્ ।
તસ્મિન્નેવ ચ રાહુશ્ચન્નરોધો દ્રવ્યનાશનઃ ॥ ૪૯॥

યત્ર ક્વાપિ ચ ભે રાહૌ દશારમ્ભે વિનાશનમ્ ।
ગૃહભ્રંશઃ સમુદ્દિષ્ટો ધને રાહુધનાર્તિકૃત્ ॥ ૫૦॥

ચન્દ્રશુક્રૌ દ્વાદશ ચેદ્રાજકોપો ભવેદ્ધ્રુવમ્ ।
ભૌમકેતૂ તત્ર યદિ વધોઽગ્નેર્મહતી વ્યથા ॥ ૫૧॥

ચેન્દ્રશુક્રૌ ધને વિપ્ર યદિ રાજ્યં પ્રયચ્છતઃ ।
દશારમ્ભે દશાન્તે ચ દ્વિતીયસ્થમિદં ફલમ્ ॥ ૫૨॥

એવમર્ગલભાવાનાં ફલં વિજ્ઞૈઃ પ્રદર્શિતમ્ ।
યસ્ય પાપઃ શુભો વાઽપિ ગ્રહસ્તિષ્ઠેચ્છુભાર્ગલે ॥ ૫૩॥

તેન દ્રષ્ટેક્ષિતે લગ્નં પાબલ્યાયોપકલ્પ્યતે ।
યદિ પશ્યેદ્ગ્રહસ્તન્ન વિપરીતાર્ગલસ્થિતઃ ॥ ૫૪॥

તદ્ભાવસ્ય દશાયાસ્તુ વિપરીતફલં ભવેત્ ।
સદ્દૃષ્ટેઽપિ શુભં બ્રૂયાન્નિર્વિશંકં દ્વિજોત્તમ ॥ ૫૫॥

યસ્મિન્ભાવે શુભસ્વામિસમ્બન્ધસ્તુઙ્ગખેચરઃ ।
સ્યાત્તદ્ભાવદશાયાં તુ અન્ત્યૈશ્વર્યમખણ્ડિતમ્ ॥ ૫૬॥

યદ્ભાવેશઃ સ્વાર્થરાશિમધિતિષ્ઠતિ પશ્યતિ ।
સ્યાતદ્ભાવદશાકાલે ધનલાભો મહત્તરઃ ॥ ૫૭॥

યસ્માદ્વ્યયગતો યસ્તુ તદ્દશાયાં ધનક્ષયઃ ।
યસ્માત્ત્રિકોણગાઃ પાપાસ્તત્રાત્મશુભનાશનમ્ ॥ ૫૮॥

પુત્રહાનિઃ પિતુઃ પીડા મનસ્તાપો મહાન્ ભવેત્ ।
યસ્માત્ત્રિકોઙ્ગા રિઃફરન્ધ્રેશાર્કારસૂર્યજાઃ ॥ ૫૯॥

પુત્રપીડા દ્રવ્યહાનિસ્તત્ર કેત્વહિસઙ્ગમે ।
વિદેશભ્રમણં ક્લેશો ભયં ચૈવ પદે પદે ॥ ૬૦॥

તસ્માત્ષષ્ઠાષ્ટમે ક્રૂરનીચખેટાદયઃ સ્થિતાઃ ।
રોગશત્રુનૃપાલેભ્યો મુહુઃ પીડા સુદુઃસહા ॥ ૬૧॥

યસ્માચ્ચતુર્થઃ ક્રૂરઃ સ્યાદ્ભૂગૃહક્ષેત્રનાશનમ્ ।
પશુહાનિસ્તત્ર ભૌમે ગૃહદાહઃ પ્રમાદકૃત્ ॥ ૬૨॥

શનૌ હૃદયશૂલં સ્યાત્સૂર્યે રાજપ્રકોપનમ્ ।
સર્વસ્વહરણં રાહૌ વિષચૌરાદિજં ભયમ્ ॥ ૬૩॥

યસ્માદ્ દશમભે રાહુઃ પુણ્યતીર્થાટનં ભવેત્ ।
યસ્માત્કર્માયભાગ્યર્ક્ષગતઃ શોભનખેચરાઃ ॥ ૬૪॥

વિદ્યાર્થધર્મસત્કર્મખ્યાતિપૌરુષસિદ્ધયઃ ।
યતઃ પઞ્ચમકામારિગતાઃ સ્વોચ્ચશુભગ્રહાઃ ॥ ૬૫॥

પુત્રદારાદિસમ્પ્રાપ્તિર્નૃપપૂજા મહૂત્તરા ।
યસ્માન્પુત્રાયકર્મામ્બુનવલગ્નાધિપાઃ સ્થિતાઃ ॥ ૬૬॥

તત્તદ્ભાવાર્થસિદ્ધિઃ સ્યાચ્છ્રેયો યોગાનુસારતઃ ।
યસ્મિન્ ગુરુર્વા શુક્રોવા શુભેશો વાપિ સંસ્થિતઃ ॥ ૬૭॥

કલ્યાણં સર્વસમ્પત્તિર્ દેવબ્રાહ્મણતર્પનમ્ ।
યત્ચતુર્થે તુઙ્ગખેટાઃ શુભસ્વામી ગ્રહશ્ચ વા ॥ ૬૮॥

વાહનગ્રામલાભશ્ચ પશુવૃદ્ધિશ્ચ ભૂયસી ।
તત્ર ચન્દ્રે ચ લાભઃ સ્યાદ્બહુધાન્યરસાન્વિતઃ ॥ ૬૯॥

પૂર્ણે વિધૌ નિધિપ્રાપ્તિર્લભેદ્વા મણિસઞ્જયમ્ ।
તત્ર સુક્રે ભૃદઙ્ગાદિવાદ્યગાનપુરસ્કૃતઃ ॥ ૭૦॥

આન્દોલિકાપ્તિર્જીવે તુ કનકાંદોલિકા ધ્રુવમ્ ।
લગ્નકર્મેશભાગ્યેશતુઙ્ગસ્થશુભયોગતઃ ॥ ૭૧॥

સર્વોત્કર્ષમહૈશ્વર્યસામ્રાજ્યાદિમહત્ફલમ્ ।
એવં તત્તદ્ભાવદાયફલં યત્સ્યાદ્વિચિન્તયેત્ ॥ ૭૨॥

એકૈકોડુદશા સ્વીયૈર્ગુણૈરષ્ટાદશાત્મભિ ।
ભિન્નં ફલવિપાકં તુ કુર્યાદ્વૈ ચિત્રસંયુતમ્ ॥ ૭૩॥

પરમોચ્ચે તુઙ્ગમાત્રે તદર્વાક્તદુપર્યપિ ।
મૂલત્રિકોણભે સ્વર્ક્ષે સ્વાધિમિત્રગ્રહસ્ય ભે ॥ ૭૪॥

તત્કાલસુહૃદો ગેહે ઉદાસીનસ્ય ભે તથા ।
શત્રોર્ભેઽધિરિપોર્ભે ચ નીચાન્તાદૂર્ધ્વદેશભે ॥ ૭૫॥

તસ્માદર્વાઙ્ નીચમાત્ર નીચાન્તે પરમાંશકે ।
નીચારિવર્ગે સખલે સ્વવર્ગે કેન્દ્રકોણભે ॥ ૭૬॥

વ્યવસ્થિતસ્ય ખેટસ્ય સમરે પીડિતસ્ય ચ ।
ગાઢપૂઢસ્ય ચ દશાપચિતિઃ સ્વગુણૈઃ ફલમ્ ॥ ૭૭॥

પરમોચ્ચગતો યસ્તુ યોઽતિવીર્યસમન્વિતઃ ।
સમ્પૂર્ણાખ્યા દશા તસ્ય રાજ્યભૂગ્યશુભપ્રદા ॥ ૭૮॥

લક્ષ્મીકટાક્ષચિહ્નાનાં ચિરવાસગૃહપ્રદા ।
તુઙ્ગમાત્રગતસ્યાપિ તથા વીર્યાધિકસ્ય ચ ॥ ૭૯॥

પૂર્ણાખ્યા બહુલૈશ્વર્યદાયિન્યાપિ રુજપ્રદા ।
અતિનીચગતસ્યાપિ દુર્બલસ્ય ગ્રહસ્ય તુ ॥ ૮૦॥

રિક્તા ત્વનિષ્ટફલદા વ્યાધ્યનર્થમૃતિપ્રદા ।
અત્યુચ્ચેઽપ્યતિનીચસ્થે મધ્યગસ્યાવરોહિણી ॥ ૮૧॥

મિત્રોચ્ચભાવપ્રાપ્તસ્ય મધ્યાખ્યા હ્યર્થદા દશા ।
નીચાંતાદુચ્ચભાગાન્તં ભષટ્કે મધ્યગસ્ય ચ ॥ ૮૨॥

દશા ચારોહિણી નીચરિપુભાંશગતસ્ય ચ ।
અધમાખ્યા ભયક્લેશવ્યાધિદુઃખવિવર્ધિની ॥ ૮૩॥

નામાનુરૂપફલદાઃ પાકકાલે દશા ઇમાઃ ।
ભાગ્યેશગુરુસમ્બન્ધો યોગદૃક્કેન્દ્રભાદિભિઃ ॥ ૮૪॥

પરેષામપિ દાયેષુ ભગ્યોપક્રમમુન્નયેત્ ।
જાતકો યસ્તુ ફલદો ભગ્યયોગપ્રદોઽથ યઃ ॥ ૮૫॥

સફલો વક્રિમાદૂર્ધ્વમન્યાનપિ ચ ખેચરાન્ ।
દુર્બલાનસમર્થાંશ્ચ ફલદાનેષુ યાગતઃ ॥ ૮૬॥

તારતમ્યાત્સુસમ્બન્ધા દશા હ્યેતાઃ ફલપ્રદાઃ ।
સ્વકેન્દ્રાદિજુષાં તેષાં પૂર્ણાર્દ્ધાંઘ્રિવ્યવસ્થયા ॥ ૮૭॥

શીર્ષોદયભગાઃ સ્વસ્વદશાદૌ સ્વફલપ્રદાઃ ।

ઉભયોદયરાશિસ્થદશા મધ્યફલપ્રદા ॥ ૮૮॥

પૃષ્ઠોદયર્ક્ષગાઃ ખેટાઃ સ્વદશાન્તે ફલપ્રદાઃ ।
નિસર્ગતશ્ચ તત્કાલે સુહૃદાં હરણે શુભમ્ ॥ ૮૯॥

સમ્પાદયેત્તદા કષ્ટં તદ્વિપર્યયગામિનામ્ ।
દશેશાક્રાંતભાવર્ક્ષાદારભ્ય દ્વાદશર્ક્ષકમ્ ॥ ૯૦॥

ભક્ત્વા દ્વાદશરાશીનાં દશાભુક્તિ પ્રકલ્પયેત્ ।
એકૈકરાશેર્યા તત્ર સુહૃત્સ્વક્ષેત્રગામિની ॥ ૯૧॥

તસ્યાં રાજ્યાદિસમ્પત્તિપૂર્વકં શુભમીરયેત્ ।
દુઃસ્થાનરિપુગેહસ્થનીચક્રૂરયુતા ચ યા ॥ ૯૨॥

તસ્યામનર્થકલહં રોગમૃત્યુભયાદિકમ્ ।
બિન્દુભૂયસ્ત્વશૂન્યત્વવશાત્ સ્વીયાષ્ટવર્ગકે ॥ ૯૩॥

વૃદ્ધિં હાનિં ચ તદ્રાશિભાવસ્ય સ્વગૃહાત્ક્રમાત્ ।
ભાવયોજનયા વિદ્યાત્સુતસ્ત્ર્યાદિશુભાઽશુભમ્ ॥ ૯૪॥

ધાત્વાદિરાશિભેદાચ્ચ ધાત્વાદિગ્રહયોગતઃ ।
શુભપાપનશાભેદાચ્છુભપાપયુતૈરપિ ॥ ૯૫॥

ઇષ્ટાનિષ્ટસ્થાનભેદાત્ ફલભેદાત્ સમુન્નયેત્ ।
એવં સર્વગ્રહાણાં ચ સ્વાં સ્વામન્તર્દશામપિ ॥ ૯૬॥

સ્વરાશિતો રાશિભુક્તિં પ્રકલ્પ્ય ફલમીરયેત્ ।
અન્તરન્તર્દશાં સ્વીયાં વિભજ્યૈવં પુનઃ પુનઃ ॥ ૯૭॥

---

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

---

*bRihatpArAsharahorAshAstramh 46-50*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*